Shri Raghunath Temple MSS. Library,
JAMMU

No. १५९९

Title अनुमान शिरोमणि दीधिति टीकायां जागदीश्यां अनुमिति ग्रन्थः

Author श्री जगदीशः

Extent ६५ Age ८

Subject न्याय वैशेषिकं

अनुमानशिरोमणिदीधितिटीकायां जागदीश्यां
अनुमितिग्रंथः

१५८८

६५ प०

६० पृष्ठ नहीं हैं



॥श्रीगणेशायनमः॥श्रीमहालसायैनमः॥ ॥सस्मिताननसरोजमंङ्गणेरिङ्गमाणमतिलोलकुंडलम्।रोचनोल्लसितभालमस्तुमेकैशवंम
नसिशैशवंवपुः॥१॥प्राच्यैरनुचितविविधक्षोदैःकलुषीकृतोप्यधुना।दीधितियुतमणिरियश्रीजगदीशप्रकाशितःस्फुरतु॥२॥परमात्मने।सर्वो
त्कृष्टात्मनेनमः।उत्कर्षश्चात्रउत्पत्तिस्थित्यादिकर्तृत्वं।तस्यचैकत्रसंभवोनसहकार्यंतरंविनाअतआह।ॐमिति।आत्मविभुरिति वात्मकायेत्यर्थः
।तथाचतत्तच्छरीरसहकारादेकस्यापिनानाकार्यकर्तृत्वंचानुपपन्नमितिभावः।यद्यपिसुखादिसमवायिकारणतावच्छेदकत्वेनद्रव्यमानसं
प्रतिविषयविधयाकारणतावच्छेदकत्वेनवासिद्धयाआत्मत्वजातेरीश्वरांवृत्तित्वादात्मनइत्यसंगतं।नित्यस्येत्यादिव्याप्तेरप्रयोजकत्वेनताद
शजातेरीश्वरवृत्तित्वोपगमेलाघवादवपितत्प्रसंगात्।द्रव्यत्वमेववासुखादिसमवायिकारणतावच्छेदकंभवेदितिप्रसंगस्यतुल्यत्वात्
अतएवलाघवेनआत्मत्वजातेरेवात्मपदप्रवृत्तिनिमित्ततयात्मपदगर्भाप्रकृतिरेवतत्रात्मत्वजातिसत्वेप्रमाणमित्युक्तावपिननिस्तारः।प्रवृत्ति

निमित्ततयाज्ञातिसिद्धेरप्रसिद्धांतत्वादितिभावः। तथाप्यत्र आत्मपदं तृप्तावदर्थकमित्याहुः। नमस्यता प्रयोजकं रूपांतरमप्याह। सर्वेति। स
र्वभूतानि। सर्वप्राणिनः विष्टभ्य। स्वस्वकर्मणि नियोज्य परितिष्ठते इत्यर्थः। केचित्तु भूतपदं यथाश्रुतार्थकमेव। विष्टंभोपि संयोगविशेषः तथा
च सर्वभूतानि पृथिव्यादीनि विष्टभ्य संयुज्य परितिष्ठत इत्यर्थः। न च विभुद्वयसंयोगास्वीकारादाकाशेन सममंतदसंभवात् संगतिः। नव्यमते गगन
स्य ईश्वरानतिरिक्तत्वात् तन्नव स्वप्रतियोगिकसंयोगविरहेपि स्ववृत्ति संयोगानपायाद् इत्याहुः केचित्तु विष्टंभ आरंभकसंयोगः भूतपदं जन्य
भूतपरं जनकत्वं द्वितीयार्थः। यथा च जन्यसर्वभूतजनकसंयोगानुकूलकृति समानाधिकरणत्वादृशयोगोत्तरस्यैश्वर्याश्रयत्वावत इत्यर्थ इति प्राहुः
वस्तुतः आकाशस्यानतिरिक्तत्वं मन्यमानानां मते आत्मावृत्तिविशेषगुणवत्त्वमेव भूतत्वं। तथा चाकाशस्यात्मानतिरेकात् भूतत्वं पृथिव्या
दि चतुष्टयमात्र इति न कोपि दोष इति ध्येयं॥ अखंडैनित्यो आनंदबोधो यस्य तस्मै। न च सुखत्वावच्छेदेन पुण्यजन्यतया नित्यसुखासंभवः। श्रुति

वाक्येभ्योनित्यसुखसिद्धेः सुखत्वावांतरजातेनखे पुण्यजन्यतावच्छेदकत्वकल्पनात्। आनंदखो धोयस्यतस्मै। नचसुखत्वावच्छेदेनपुण्यजन्यतया॰
नित्यसुखासंभवः। श्रुतिवाक्येभ्योनित्यसुखसिद्धेःसुखत्वावांतरजातेदायस्वर्गादिरूपायबोधोयस्यतादृशोयो ऽखंडोनित्यस्तस्मैनमइतिवार्थः।
अखंडोदःखानवच्छिन्नानंदोयस्मात् एतादृशबोधोयस्यतस्मैवस्तुअर्थस्तुविषयतेत्यपिकश्चित्। पूर्णायस्वनिष्ठसुखदुःखाभावगोचरेच्छाव
च्छिन्नाय। इदानींग्रंथस्यनिगूढार्थकत्वंमात्रोक्तार्थकत्वेचदर्शयति। पुरञ्जुष्टेति। इदानीमात्म। नोनिमूढत्वंव्यंजनयाप्रतिपादयति। न्यायमिति। इ
दानींविनयपुरःसरंग्रंथस्यनिर्दोषत्वंव्यंजनयाप्रतिपादयति। मान्यानिति। निपुणंविभाव्येति। वस्तुतो निपुणविभावनेदोषाःस्वयमेवप्रया॰
स्यंतीतिभावः। संगतिप्रदर्शनप्रतिज्ञयोरर्थांतरत्वंनिराचिकीर्षुस्तयाःप्रकृतोपयोगितांदर्शयति। पूर्वेत्यादिना। अत्रवसंगतिप्रदर्शनस्यफल
मेकवाक्यताप्रतिपत्तिः। प्रतिज्ञायास्तुफलंशिष्यावधानं। तत्रोत्तरग्रंथंप्रवृत्त्यनुकूलव्यापारवत्त्वरूपंतत्रप्रवृत्त्यनुकूलवर्त्तमानकृतिसाध्य॰

ताज्ञानादिपर्यवसितमिति। अस्ति चोत्तरग्रंथे पूर्वग्रंथार्थसंगतार्थकत्वरूपहेतुना पूर्वग्रंथेन सह एकप्रयोजनहेतुप्रतिपत्तिकत्वरूपस्ये
पूर्वग्रंथैकवाक्यत्वस्यानुमानसै। तच्चोत्तरग्रंथज्ञानस्येष्टसाधनत्वधीपर्यवसन्नमतः प्रस्तुतप्रवृत्त्युपयोगितया संगतिप्रदर्शनस्य नार्था
न्तरत्वं। एवं प्रतिज्ञापुरनुमाननिरूपणे लट्लकारा वर्तमनवृत्तेः साध्यत्वं बोधयंति उत्तरग्रंथे वृत्त्युपयोगिनो वर्त्तमानवृत्ति साध्यताज्ञानस्य प्रयो
जिकेति भावः। अत्र च व्याख्येयग्रंथस्य स्वरसं वलितस्यैव धारणं संप्रदायसिद्धमतः प्रत्यक्षतीत्यपहाय प्रत्यक्ष विती त्युक्तमिति तु भ्रमः। दीधिति
वृत्तैव व्यासनंतरमिति यक्षतायग्रंथस्य व्याप्तीति प्रकारेण धृतत्वात्। तादृशानियमस्य संप्रदायासिद्धत्वात्। परं त्वनियमः क्वचिदेवं क्वचिदन्यथा
पि धारणमिति ध्येयम्। वस्तुत प्रत्यक्षानंतरमित्यस्य धारणभ्रमनिरासायतथोक्तमिति। अनुमाननिरूपणस्यैव प्रतिज्ञेयत्वेन अनुमितेरप्रति
ज्ञेयतया अग्रे तन्निरूपणमर्थांतरग्रस्तं स्यादतोऽनुमितेरनुमानस्य चद्वयोरेव निरूपणस्य प्रतिज्ञेयतामावेदयितुमाह। अत्रेति। अत्र प्रत्यक्षोप

दी॰टी॰जा॰सं॰

२

3

जीवकत्वादित्यादिग्रंथो। प्रतिपाद्यत्वंसमम्यर्थः। फलतः फलयोः साक्षात्कारानुमित्योः स्वरूपतः स्वरूपयोः प्रत्यक्षप्रमाणानुमानप्रमाणयो
रुपजीव्योपजीवकभावः। प्रतिपाद्य इत्यर्थः। तथा च मूले प्रत्यक्षपदस्य प्रत्यक्षप्रमितितत्करणोभयपरतयाऽनुमानपदस्य च भवकरणव्यु॰
त्पत्तिभ्यां अनुमितितत्करणोभयपरतया नुमितेस्तत्करणस्य च द्वयोरेव निरूपणस्य प्रतिज्ञातत्वान्नानुमितिनिरूपणे अर्थांतरत्वमिति॰
भावः। केचित्तु आचार्यमतेनित्यस्यजात्यादेरप्यनुमानुत्वाद्वक्ष्यमाणानुमानत्वावच्छेदेन प्रत्यक्षोपजीवकत्वस्य संगतित्वलाभाय उक्तं फलत
इति। फलद्वारक इत्यर्थः तथा च प्रत्यक्षफलोपजीवकत्वमेव संगतिः तथा च स्वाश्रयकरणत्वपरंपरासंबंधेनानुमानगतत्वं साक्षात्संबंधेन प्र
त्यक्षोपजीवकस्य संगतित्वलाभार्थं लिंगज्ञानकरणतावादिनो मणिकरस्य मतमालोक्योक्तं स्वरूपत इतीत्याहुः। तत्र लिंगस्य नित्यत्वेनुमितीत्या
दिग्रंथविरोधात्। ननूपजीवकत्वं न संगतिः अनंतराभिधानव्याप्यस्यैव संगतित्वात्। अनुमितेस्तूपजीवकस्य तत्साक्षात्कारस्यानुमित्यनंतरमनि॰

२०८

२

रूप्यतयायस्यप्रमाणफलस्यउपजीवकंयत्प्रमाणफलंतत्तन्निरूपणानंतरंनिरूप्यमितिव्याप्तिविरहात्प्रत्यक्षफलस्येतिविषयतानव

च्छिन्नोपि। अनुमित्यनुव्यवसायादेरित्यादिपदेनानुमित्युपनीतधर्मप्रकारकप्रत्यक्षसंग्रहः। सर्वेति। अयंघटइत्यादिप्रत्यक्षस्यैवानुमित्य

नुपजीवकत्वादिति। तथा चोपजीवकत्वमात्रस्यानंतराभिधानव्याप्यत्वाभावेपिप्रमाणफलविभाजकोपाधिव्यापकत्वविशिष्टमुपजीव

कत्वंतादृशाभिधानव्याप्यमेवेतिस्यादेवोपजीवकत्वसंगतिरिति भावः। ननुप्रमाणफलविभाजकोपाधिव्यापकत्वविशिष्टंसाक्षात्कारोप

जीवकत्वमनुमितावसिद्धं शाब्दादिपरामर्शादप्यनुमित्युत्पत्त्यानुमितित्वावच्छेदेनसाक्षात्कारोपजीवकत्वाभावात्तत्कुतोस्यसंगतिस्त्वमतआह।

अनुमि। तयस्त्विति। साक्षादिति। तथाचोपजीवकत्वंप्रयोज्यतामात्रंनत्वनन्यथासिद्धत्वघटितमपीति भावः। नन्वेवमुक्तस्योपजीवकताविशेष

स्यैवानंतराभिधानव्याप्यत्वेप्रत्यक्षोपजीवकत्वादित्युपजीवकतामात्रस्यव्याप्यताप्रत्यायकोमूलग्रंथोविरुद्धइत्यतआह। पुरस्त्वतइति। अयं

प्रमाणफलविभाजकोपाधिव्यापकत्वरूपउत्कर्षपुरस्कृतः ग्रंथकृतापितात्पर्यविषयीकृतः सामान्यशब्दस्य लक्षणया विशेषबोधकत्वादि
ति भावः ननु परं परोपजीवकत्वस्यापि संगतित्वे प्रमाणफलविभाजकोपाध्यवच्छिन्नोपजीवकत्वमपि न तादृशाभिधानव्याप्यं प्रत्यक्षप्रमिता
वनुमितिरूपावृत्तेरुपजीवकत्वेप्यनुमित्यनंतरं तन्निरूपणात्तत्कुतोस्य संगतित्वमित्याशंकते। यद्यपीति। अदृष्टजननीमिति। तत्प्रयोजिकामित्य
र्थः। समयः शक्तिः मत्कर्तव्यतादीत्यादिपदादिष्टसाधनत्वादेः संग्रहः। अयं भावः कार्यमात्रं प्रति अदृष्टस्य हेतुतया साक्षात्कारादिकं प्रत्यपि धर्मा
दिकं हेतुः। तत्र स्वकारणीभूतं यागादिश्च स्वगोचरप्रवृत्तिं यागादिप्रवृत्तिश्च यागादिगतेष्टसाधनत्वधियं तादृशधीश्च वेदं विनानुपपद्यमाना वेद
स्य पदानां शक्तिग्रहमपेक्षते। इदं पदमत्र शक्तमसति वृत्त्यंतरे वृद्धैस्तत्र प्रयुक्तत्वादित्याद्यनुमितिरूपं शक्तिग्रहं विना वेदवाक्यादर्थावगमासंभवात्।
एवं प्रवृत्तिजनिका यागो मत्कृतिसाध्य इत्यादिधीरप्यानुमानिकी एवमदृष्टं तर्भावेन विधेः शक्यभावादिति। इदं तु चिंत्यते। यत्र शाक्यादिघटकप्रत्येकप

दार्थोवच्छिन्नायामनसैवशक्तेर्मत्कर्तव्यतादेर्वाग्रहात्प्रवृत्तिस्तत्रयादृष्टजन्यप्रत्यक्षव्यक्तेरेवानुमित्यनुपजीवकत्वात्तु सकलमेवेत्याचयुक्तं।किंचयत्र
दंतर्भावेनसामान्यव्याप्तौव्यभिचारेपिअनुमितिनिष्ठप्रत्यक्षोपजीवकत्वैद्रूप्येणप्रत्यक्षानंतराभिधानव्याप्यत्वादेवतत्रसंगतिलक्षणसंभवेनसा
क्षात्कारादावनुमित्युपजीवकत्वहेतोर्व्यभिचारदर्शनात्तोचित्यमितिदिक्।ननुप्रत्यक्षफलमात्रस्यानुमित्युपजीवकत्वेपितद्गतमनुमित्युपजीवकत्वं
नप्रमाणफलविभाजकधर्मव्यापकंप्रमाणफलविभाजकस्यसाक्षात्कारत्वस्यनित्यज्ञानेपिसत्वादत आह।ईश्वरेति।तथाचजन्यसाक्षात्कारत्वंप्रमा
णफलविभाजकंनतुसाक्षात्कारत्वमात्रंनित्येऽतिप्रसक्तत्वात्।तद्व्यापकत्वविशिष्टमनुमित्युपजीवकत्वंचनानुमित्यनंतराभिधानव्याप्यमितिव्यभि
चारस्तदवस्थएवेतिभावः।दृष्टेति।दृष्टद्वारकत्वंतन्मात्रद्वारकत्वमदृष्टाद्वारकत्वपर्यवसितं।तेनादृष्टद्वारकस्यापिप्रवृत्त्यादिरूपदृष्टद्वारकतयानोक्तदो
षः।तथात्वम्।प्रमाणफलविभाजकोपाध्यवच्छिन्नमुपजीवकत्वम्।इतरस्याउक्तधर्मानवच्छिन्नोपजीवकतामात्रस्याअविनिगम्यत्वात्।अनंतराभि

धानरूपं यत्साध्यं तद्धत्येव वक्तेनेतव्यत्रेतिविनिगमनायाः अविषयत्वात्। व्यभिचारित्वादित्यावत्। यत्प्रमाणं यस्योपजीवकं तत्तदनंतरनिरूप्यमि
ति व्याप्तेरनुमानोत्तरानिरूपिते प्रत्यक्षप्रमाणे व्यभिचारात्। स्वरूपतरुपजीवकतापि प्रमाकरणतावच्छेदको या ध्यवच्छिन्नैव ग्राह्येत्यभिप्रायेनाह। सर्व
मिति। व्याप्तिबुद्धिनामेवानुमानत्वात्तासां सर्वासामेव मनःस्वरूपप्रत्यक्षप्रमाणाधीनत्वादिति भावः। अथानुमितिप्रमाकरणतावच्छेदकं व्याप्तिज्ञा
नत्वं तदवच्छिन्नं च न प्रत्यक्षप्रमाणोपजीवकत्वं व्याप्तिज्ञानत्वस्येश्वरबुद्धावपि वृत्तेरिति प्रकृतासिद्धिरित आह। अनुमितिमित्यादि। भावयतः जनयतः। त
त्करणतेति। अनुमितिकरणताया निर्वाहिका घटिकाया प्रत्यासत्तिः संबंधः। जन्यत्ववैशिष्ट्यरूपस्तद्विरहेणानत्वात्। अनुमित्यकरणत्वादित्यर्थः।
व्याप्तिज्ञानत्वं नानुमितिकरणतावच्छेदकं तथा सति तद्वतो नित्यज्ञानस्य स्वरूपयोग्यतया ततोनुमित्यात्मकफलावश्यंभावापत्तेः किंतु जन्यत्वविशिष्ट
व्याप्तिज्ञानत्वं तदवच्छिन्नं च भवत्येव प्रत्यक्षप्रमाणोपजीवकत्वमतो नासिद्धिरिति भावः। अनुमितिकरणत्वावच्छेदेन प्रत्यक्षोपजीवकत्वं संपाद्य प्रत्य

य
रम
५

क्षकरणतावच्छेदेनानुमानोपजीवकत्वस्यव्यतिरेकमाह। सर्वंपुनरिति। ननुव्याप्तिज्ञानत्वमेवानुमितिकरणतावच्छेदकं नित्यस्यस्वरूपयोग्य

त्वेत्यादिव्याप्तेरप्रयोजकत्वात्। प्रयोजकत्वेवासमवायिकारणस्थलीयत्वात्तत्रैवप्राच्यैस्तादृशव्याप्तेः सर्वत्रोद्भावितत्वात्। तथाचहेत्वासिद्धिरत

आह। दृष्टद्वारेति। दृष्टमात्रद्वारेत्यर्थः। तथाचादृष्टमद्वारीकृत्ययत्प्रमाणयदुपजीवकंतत्तदनंतरनिरूप्यमित्येवव्याप्तिः। ननुप्रमाणतावच्छेद

कोपाध्यवच्छिन्नत्वमपिनिवेश्यमितिभावः। निरुक्तमनुमानोपजीवकत्वंनप्रत्यक्षेऽस्तियतोव्यभिचारःस्यादित्याह। नचेति। अपिनानिर्येंद्रि

यंसंतरांनानुमानमपेक्षतइतिसूचितं। अथादृष्टमद्वारीकृत्यप्रमाणंयदुपजीकंतत्तदनंतरनिरूप्यमित्यपिनव्याप्तिः। यत्रचक्षुर्घर्षणाद्रस

विशेषयानाद्वापूर्वंचक्षुर्नाशानंतरंचक्षुःसंतरोत्पादस्तत्रादृष्टद्वारकस्यघर्षणरसपानादिप्रयोजकस्यतज्जतेष्टसाधनत्वाद्यनुमानस्यो

पजीवकेऽनुमानानंतरानिरूपितेचरमचक्षुषिरसपानाधीनप्ररूढचक्षुषिचव्यभिचारात्। नचात्रोपजीवकत्वंजन्यतारूपमेवघटकमुक्तस्थ

रम

दी॰टी॰जा॰सं॰॥

६

6

त्वेतु चक्षुषोनुमानप्रयोज्यत्वमेवेत्यदोषः। तथा सति अदृष्टाद्वारकत्वविशेषणवैयर्थ्यं। एतेनेत्याशयेनाशङ्कते। अथेति। उपजीवकमिति। अ
दृष्टमद्वारीकृत्येत्यादिः। एवं कार्यमित्यत्रापि॥ क्वचिदिति। यत्रोक्तप्रणाल्या चक्षुरन्तरोत्पादस्तत्रत्यं कार्यमित्यर्थः। प्राच्यैरनन्तराभिधानव्या
प्यस्यैव संगतित्वमतस्तन्मतमनुसृत्यैव प्राक्प्रपंचितं। वस्तुतस्तादृशनियमाभावेपि न क्षतिः। प्रत्यक्षोपजीवकत्वादित्यत्र पंचमी न हेतुता
यां किंतु ज्ञानप्रयोज्यतायां॥ स्वात्मवर्त्तत इत्यादौ तथाव्युत्पत्तेरित्याशयेन परिहरति। किं चात इत्यादि अनन्तराभिधानव्याप्यस्यैव संगतिपदार्थ
त्वे तद्दोषतादवस्थ्यमतोन्यथैव संगतिपदार्थनिर्वक्ति। अनन्तरेति। तदभिधानानन्तरं तदभिधानस्य प्रयोजिका या जिज्ञासा तज्जनकज्ञानविषयो
योर्थः स तत्र तस्य संगतिरित्यर्थः। अत्र च प्रत्यक्षं कस्यचित्कारणमिति ज्ञानोत्तरं प्रत्यक्षकार्यत्वेन सामान्यतः प्रत्यक्षकार्यज्ञानं तदः सामान्यप्रका
रेण ज्ञानस्य विशेषधर्मप्रकारकजिज्ञासाजनकत्वाद्विशेषतः प्रत्यक्षकार्यज्ञानं भवतीतीच्छा शिष्याणां सैव च किमस्य कार्यमित्याकारा ततश्च वि
शेषतः

२ग

६

प्रत्यक्षकार्यज्ञानस्येष्टस्यसाधनतयानुमानादिरूपप्रत्यक्षकार्यबोधकानांवाक्यानांज्ञानात्तत्रेच्छाततदिष्टस्यतादृशवाक्यस्यसाधनताज्ञानात्कं
ठक्रियायांगुरोःप्रवृत्तिःततस्तुकंठक्रियात्कंठाभिघातेच्छाततइष्टस्यकंठाभिघातस्यसाधनताज्ञानात्कंठक्रियायामिच्छाततःघभिघातादिक्र
मेणप्रत्यक्षकार्यात्मकानुमानबोधकवाक्यस्यानंतराभिधानरूपस्यनिष्पत्तिरितिप्रत्यक्षानंतरमनुमानाभिधानस्यपरंपरयाप्रतियोगिका॰
याः किंप्रत्यक्षकार्यमित्याकारकजिज्ञासायाजनकंयत्प्रत्यक्षकार्यज्ञानंइष्टसाधनमित्याकारकंज्ञानंतस्यविषयःप्रत्यक्षकार्यमितितत्रल
क्षणसमन्वयः।जिज्ञासाजनकज्ञानविषयत्वमात्रस्यघटादावतिप्रसक्तत्वेनप्रयोजकांतंजिज्ञासाविशेषणं।प्रत्यक्षानंतरमनुमानस्या॰
भिधानप्रयोजिकाप्रत्यक्षकार्याभिधानेच्छापीतितज्जनकज्ञानस्यविषयेप्रत्यक्षकार्याभिधानादावतिव्याप्तिरतोजिज्ञासानुसरणं।प्रत्यक्षका
र्यज्ञानस्ययत्फलंसुखादितद्गोचरज्ञानस्यापितादृशजिज्ञासाप्रयोजकत्वात्तद्विषयेसुखादावतिव्याप्तिरतस्तादृशजिज्ञासायाःप्रयोजकत्व

मुपेक्ष्य जनकत्वमुक्तं। फलेच्छयैवान्यथासिद्धस्य फलज्ञानस्योपायेच्छां प्रत्यहेतुत्वात्। तादृशजिज्ञासाजनिका या फलेच्छा या विषये फलादौ तथा
व्यतिप्रसंगः अतो ज्ञानपदं। यत्र क्रमेण दंडचक्रयोर्निरूपणोत्तरं दंडस्य किं कार्यमिति जिज्ञासया घटो निरूपितः तत्र दंडकार्यत्वमपि घटे चक्रस्य॰
संगतिः स्यात्। तत्र चक्राभिधानानंतरघटाभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्वात्। अतउक्तमर्थ इति। तज्ज्ञानजन्यतद्विशेष्यकयथा॰
र्थस्मृतिविषयतापन्न इति तदर्थः। तथा चोक्तस्थले दंडज्ञानेनैव दंडकार्यत्वप्रकारेण घटोस्मारितः ननु चक्रज्ञानेनेति नातिव्याप्तिः। एवं यत्र चक्र
ज्ञानोत्तरमेव दंडकार्यत्वप्रकारेण घटं स्मृत्वा तस्य निरूपणं तत्र दंडकार्यत्वमपि घटे चक्रस्य प्रसंगतिर्भवत्येव। न च यथार्थपदवैयर्थ्यं। यत्र दंडकार्यं कि
मिति जिज्ञासायां भ्रमवशेन दंडोत्तरं गगनादिकं निरूपितं तत्र गगनादौ दंडकार्यत्वस्य संगतित्वापत्तेः। न चैवं यत्र प्रथमत एव घटबोधेच्छया घटस्य नि
रूपणे तस्मकस्यापि संगतिर्घटेन स्यादिति वाच्यं। इष्टत्वात्। तदनंतरनिरूप्यत्वस्यैव तत्संगतित्वनियमेन निरूप्यत्वमात्रस्य संगत्यनियतत्वात्। यच

पिचैवमपिप्रत्यक्षकार्यज्ञानंमिष्टसाधनमित्येवबोधस्यैवप्रत्यक्षकार्यंकिमितिजिज्ञासायाः कारणत्वात्तद्विषयेज्ञानेज्ञानत्वादाविष्टसाध
नत्वादौचातिव्याप्तिः।तथापियद्धर्मविशिष्टविषयकज्ञानधर्मिकेष्टसाधनताज्ञानत्वेनतदनंतरंतदभिधानप्रयोजकजिज्ञासांप्रतिजनक
त्वंतादृशधर्मस्तस्यतत्रसंगतिरितिविवक्षितं।अत्रतदभिधानानंतरंतदभिधानंप्रतियद्रूपेणजिज्ञासायाःप्रयोजकत्वंतद्रूपावच्छिन्नकार्य
ताप्रतियोगिकत्वमेवतादृशजिज्ञासाजनकत्वंवक्तव्यं।तेनयत्रकोघटःकिंद्रव्यमितिसमूहालंबनजिज्ञासयानीलोघटइत्येवाभिधानंत
त्रनद्रव्यत्वेऽतिप्रसक्तिः।नीलोघटइत्येवाभिधानंप्रतिकोवघटइतिजिज्ञासात्वेनैवप्रयोजकतयातदवच्छिन्नंप्रतिद्रव्यत्वविशिष्टविषय
कज्ञानधर्मिकेष्टसाधनताज्ञानत्वेनाहेतुत्वात्।नचयद्धर्मविशिष्टविषयकज्ञानेच्छात्वेनजिज्ञासायाअनंतराभिधानप्रयोजकत्वंतत्वमित्येवस
म्यक्।ज्ञानविषयत्वादिप्रवेशोव्यर्थइतिवाच्यं।तस्यलक्षणांतरत्वेनयथासंनिवेशोवैयर्थ्यविरहात्।अतएवतदनंतराभिधेयवृत्तित्वेसति

तऽज्ञानजन्यस्मृतिप्रकारतापन्नमित्येवसम्यगितिसमाहितम्।नव्यास्तुअनंतराभिधानेत्यादेःस्वार्थधीद्वारानंतराभिधानस्यप्रयोजि
कानिवर्त्यायाजिज्ञासाप्रत्यक्षकार्यंकिमित्याकारातस्याजनकंविषयविधयाजनकतावच्छेदकंयज्ज्ञानंतस्यविषयोविषयतावच्छेदकःप्रत्य
क्षकार्यत्वमित्यर्थइतिवदंति।यत्तुकार्यत्वाद्यन्यतमत्वंसंगतित्वमिति।तन्न।तदनंतरमनिरूपितेपितत्कार्यत्वादेस्तत्संगतित्वापत्तेःप्रमेयनिरू
पणोत्तरंप्रमेयवत्त्वंकिमितिजिज्ञासयायत्रप्रमेयवान्निरूपितस्तत्रप्रमेयस्वरूपायांप्रसंगसंगतावव्याप्तेःप्रमेयभेदाप्रसिद्ध्यातदन्यतमत्वस्यदुर्व
चत्वादितिध्येयं।संगतिःषड्विधा।तदुक्तमभियुक्तैः।सप्रसंगमुपोद्घातोहेतुतावसरस्तथा।निर्वाहकैककार्यत्वेषोढासंगतिरिष्यतइति।तत्रनिर्दि
ष्टोपपादकत्वमुपोद्घात।चिंतांप्रकृतिसिद्ध्यर्थामुपोद्घातंविदुर्बुधाइति।प्राचीनगाथायामपिचिंतापदंतदभिहितोभावोऽइतिन्यायेनचिंतनीय
परं।तथाचतस्याअपिप्रकृतसिद्ध्युपपादकतयाचिंतनीयत्वंप्रकृतसिद्ध्युपपादकत्वंपर्यवसन्नमेवार्थः।हेतुत्वंकारणत्वं।अवसरोऽनंतरवक्तव्यत्वं।

राम
८

अनंतरोद्दिष्टत्वं तथेति तुन्यायभास्करे रूतः। निर्वाहकं। कार्यतानिर्वाहकं कार्यत्वमेतैक्यमितिया वत्। एककार्यत्वं एककार्ययोरिति व्युत्पत्या।
एककार्यकारित्वम्। प्रसंगत्वं तु संगतित्वे सत्युपोद्धातादिभिन्नत्वं। स्मृतस्योपेक्षानर्हत्वं प्रसंग इति प्रवादेपि स्मृतत्वमनंतराभिधानप्रयोजकजिज्ञा
साजनकस्मृतिविषयत्वं। उपेक्षानर्हत्वं च प्रसंगलक्षणे उपेक्षार्हायेउपोद्धातोदयस्तदन्यत्वं। तेन ततोपि प्रागुक्तस्यैवार्थस्य लाभ इति संक्षेपः। कार
ण त्वस्य कार्यत्वस्य वेति षष्ठ्यर्थः प्रकारित्वं। तथा च कार्ये ज्ञाते कारणत्वप्रकारेण काणस्य ज्ञानात् किमस्य कारणमिति जिज्ञासा कारणे ज्ञाते च
कार्यत्वस्य प्रकारेण कार्यज्ञानात् किमस्य कार्यमिति जिज्ञासो जायत इत्यते तेमन्वयः। कार्यकारणज्ञानयोरुक्त कारणकार्यज्ञानजनकत्वमेकसंबंधि
ज्ञानस्यापरसंबंधिस्मारकतयेति भावः। जिज्ञासेति। तदुक्तं स्वं च कार्यादिधीजनकवाक्यघ्नादिक्रमेण कार्याद्यभिधानमिति शेषः। इत्थं चेति।
संगतेरनंतराभिधानव्याप्यत्वाघटितत्वे चेत्यर्थः। तुल्यत्वेपीति तथा च व्याप्यतारक्षार्थं प्रागुक्त उत्कर्षो नादरणीयः। प्रत्यक्षोपजीवकत्वादिति पंचमी

तुज्ञानजन्यजिज्ञासाप्रयोज्यज्ञायांनतुहेतुतायामिति भावः। लाघवायेति॥ संगतिप्रदर्शनस्ययत्फलं एकवाक्यतानुमानंतल्लाघवायेत्यर्थः। अ
नुमानोपमाने पक्षीवृत्य समूहालंबनरूपएकवाक्यतासाध्यकानुमित्यपेक्षयोपमानधर्मिकेकवाक्यता। नुमित्यंतरकल्पनाया गौरवादिति। अ
थानुमानगतंबहुवादिसंमतत्वंकथमुपमानेसंगतिरतआह। सुप्रसिद्धतयेति। इष्टसाधनीभूतप्रतिपत्तिकतयेत्यर्थः। सुप्रतिपद्यतयात्र्यनिष्टा
जनकप्रतिपत्तिकत्वेनाश्रद्धेहेतुः निरसनीयेत्यादिः। तथाचानुमानप्रतिपत्ताविष्टसाधनत्वानिष्टाजनकत्वयोः सत्वात्तत्प्रतीसातत्रेच्छोत्पत्तौबाध
कंनास्तीति भावः। नोपमानइति। जिज्ञासेत्यनुषज्यते। अप्रसिद्धत्वादिति। येषामुपमानेविप्रतिः तेषामुपमानज्ञानात्मनो धर्मिणएवासत्वात्कुत्रेच्छास्या
दिति भावः। यस्योपमानसंगतिस्तस्याप्युपमानप्रतिपत्तौबहुतरदुःखानुबंधित्वग्रहान्नेच्छासंभवतीत्याह। निरसनीतिच। दुरूहत्वंबहुतरदुःखानुबं
प्रतिपत्तिकत्वं। ननुबहुतरदुःखानुबंधिन्यपिपदार्थेतादृशदुःखेबलवद्द्वेषाभावदशायांप्रथमंजिज्ञासाजायतएवेत्यतआह। औत्सर्गिकीमिति।

प्रायशो बहुतरदुःखजनकत्वग्रहे द्वेषो भवत्येवेति शीतिमनुरुध्येत्यर्थः। तथाचेति। प्रथमम् अनुमानजिज्ञासोत्पत्तौ तन्निवृत्तौ उपमाननिरूपणमिति
भावः। ननु प्रतिबंधकीभूतशिष्यजिज्ञासानिवृत्तिरूपस्यावसरस्य कुतः संगतित्वं तत्प्रकारकजिज्ञासाया अनंतरम् अनभिधानाद् अत आह। यथा-
चेति। अवसरस्य। अवरपदार्थस्य। आकरे पंचमतत्त्वबोधादौ अनंतरवक्तव्यत्वमवावसरः तत्राचातः परं किं वक्तव्यमिति जिज्ञासयैवानंतरा-
भिधानान्न लक्षणाव्याप्तिरितिरिति भावः। आनंतरोद्दिष्टत्वमेवावसरः अत एवावसरतः कथकाशक्तिनिरूपणमिति परिशिष्टव्याख्यानेन्याय-
भास्करकृतो दृश्यलक्षणा चात्र संगतिरित्युक्तमित्यपि केचित्। सार्वभौममतमाह। शाब्दांतरेति। गोसदृशो गवयपदवाच्य इत्यातिदेशवा-
क्यार्थज्ञानस्य गवादिपदशक्तिग्रहं विनानुपपत्तेर्गोपदं गविशक्तमसति वृत्त्यंतरे वृद्धैस्तत्र प्रयुक्तत्वादित्याद्यनुमानापेक्षा। उपमित्यात्मकस्य गवया-
दिपदशक्तिग्रहस्यानुमानाधीनत्वात् पूर्वं तन्नापेक्षितमतः शाब्दांतरेत्युक्तं। गवयादिपदस्य निःशक्तित्वग्रहेऽतिदेशवाक्यार्थज्ञानासंभवात्। तत्र

तिबंधार्थं गवयपदं किंचिदवधिनशक्तिमत् साधुपदत्वादित्येवंविधमुपमितिविषयीभूतस्यगवयादिपदस्यापिशक्त्यनुमानं प्रागपेक्षितं भवती
त्याशयेनाह। सप्रवृत्तिनिमित्तत्वेत्यादि। ननुयत्रमनसैवगवयपदवाच्यत्वग्रहसहकृतसादृश्यज्ञानादुपमितिस्तत्रोपमानस्यशक्त्यनुमानानपे
क्षितत्वान्निखिलोपमानेऽनुमानापेक्षितत्वंनसंभवतीत्यतआह। अंततइति। बहुवादीत्यादिग्रंथतस्तादृशसंगतेरलाभएवेतिकेचिदित्यत्र
नास्वरसः। अथोपजीवकत्वसंगतेरनंतराभिधाननियामकत्वोपेक्षपायामनुमानोत्तरमेवप्रत्यक्षंकिंननिरूपितमतआह। संभवतिचेति। इ
हप्रत्यक्षानुमानस्थले। निरूपणमत्रज्ञानंनतुतदर्थकःशब्दः प्रत्यक्षबोधकशब्दस्यानुमानार्थकशब्दंप्रत्यहेतुत्वात्। तथाचप्रत्यक्षस्यप्रागज्ञा
नेऽनुमानधीरेवनस्यात्। कारणंविनाकार्यानुत्पत्तेः। प्रागप्रत्यक्षंनिरूपितमितिभावः। अनुमानत्वादिरूपेणानुमानज्ञानेव्यभिचारात्। प्रत्यक्षनिरू
पणंनानुमाननिरूपणेहेतुरतआह। अथतत्पूर्वकमिति। तथाचसामान्यतोव्यभिचारेपिप्रत्यक्षपूर्वकत्वेनानुमाननिरूपणंप्रत्यक्षज्ञानजन्यमि

वेति भावः। अथ तत्पूर्वकमनुमानं त्रिविधं पूर्ववच्छेषवत्सामान्यतो दृष्टं चेति सूत्रम्। अत्र प्रत्यक्षानंतरमनुमानं लक्ष्यत इति शेषः। तच्चत्रि

विधं तदाह पूर्ववदित्यादि। पूर्वं कारणं तद्वत्ता लिंगकं। यथा ज्ञानचिकीर्षादिहेतुना प्रवृत्त्याद्यनुमानं। शेषः कार्यं तद्वल्लिंगकं। यथा धूमादिना

वह्न्याद्यनुमानं। कार्यकारणभिन्नल्लिंगकं तु सामान्यतो दृष्टं। यथा पृथिवीत्वादिना द्रव्यत्वादेरनुमानमिति वाचस्पति। मिश्रास्तु दृष्टमिति

त्रान्वितम्। यथा च पूर्वमन्वयसहचारस्तद्वत्तया दृष्टं गृहीतं शेषो व्यतिरेकसहचारस्तद्वत्तया गृहीतं। सामान्यतस्तदुभयसहचारतया गृही

तमित्येवं त्रैविध्यमित्याहुः। तच्च सूत्रेण सौत्रेण व्याप्त्यादीति। व्याप्त्यादेः प्रत्यक्षं यस्मादिति व्युत्पत्त्या प्रत्यक्षप्रमाणपरामर्शादित्यर्थः। य

थाश्रुते व्याप्त्यादिसाक्षात्कारपूर्वकत्वेनानुमानफलानुमितिनिरूपणस्य सूत्राल्लाभेपि प्रत्यक्षप्रमाणनिरूपणस्यानुमाननिरूपणहे

तुत्वालाभादसंगत्यापत्तेः। नव्यास्तु प्रत्यक्षफलानुमानफलयोः क्रमेण निरूपणे नियमाकांक्षायामाह। संभवति चेति। तत्पूर्वकमित्यादि।

११

सूत्रे चानुमानपदं भावव्युत्पत्त्यानुमितिपरं व्याख्यादि प्रत्यक्षेतियथाश्रुतमेव सम्यगिति प्राहुः। नन्वेतावता सौत्रक्रमस्योपपादितत्वेपि ग्रन्थ
तन्त्रं थक्रमो नोपपादित इत्यत आह। अत्रापीति। अनुमानखंडेपी त्यर्थः। सहचारेति। अत्र प्रत्यक्षत्वमिंद्रियसन्निकर्षजन्यज्ञानत्वरूपं
प्रत्यक्षमण्युत्वा त्वंनतु साक्षात्कारत्वरूपं। तथा सति प्रत्यक्षप्रमाणनिरूपणस्य हेतुत्वाप्राप्तेरित्यवधातव्यं। तन्निरूपणात् अनुमाननि-
रूपणात्। तस्यचेति। प्रत्यक्षपूर्वकत्वेनक्षहचारप्रत्यक्षजन्यत्वेन चाऽनुमाननिरूपणस्येत्यर्थः। अनुमानोपमानयोरपिक्रमेण निरूपणे
कार्यकारणभाव। एवनियामक इत्याह। एवंमिति॥ ॥श्री॥ ॥अथानुमानपदेन भावव्युत्पत्त्या अनुमितेरपिनिरूप्यत्वेन प्रतिज्ञातत्वात्
तन्त्रेत्यत्र च्छेदेनानुमितेः परामर्शैरनुमितेरनुमिति। वविशेषणत्वात्संप्तम्यर्थासंगतिरतः करणव्युत्पत्त्या लब्धमनुमानमेव। परामृश्य-
व्याचष्टे। तत्रेति। निरूपणीयइति प्रकारांतरेणव्याप्तिज्ञानत्वानुमितिकरणत्वादिनानिरूपणीये॥ अनुमाने व्याप्तिविशिष्टपक्षधर्मताज्ञान

राम
११

जन्यज्ञानत्वप्रकारेणानुमितेरविशेषणत्वात्तत्रेत्यत्रसप्तम्यर्थतादृशविशेषणत्वमुपपादयितुमध्ये पूरयति। लक्षणस्वरूपप्रामाण्यादिभिरि

ति। अत्र तृतीयार्थः प्रकारिता। आदिना विभागपरिग्रहः। तत्करणमित्यादिना लक्षणस्य तत्र लिंगेत्यादिना स्वरूपस्य अथानुमानमित्यादिना॰

प्रामाण्यस्य च निरूपणे यदनुमानं निविष्टं तत्र व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानत्वेनैवानुमितेर्विशेषणान्नासंगतिरिति भावः। ननु प्रा

गुक्तक्रमेणानुमित्यनुमानयोर्द्वयोरेव निरूपणस्य प्रतिज्ञातत्वादनुमाननिरूपणपूर्वमेवानुमितिः कथं निरूपितेत्यत आह। करणस्येति। क्रिया

यानुमितेर्भेदो व्यावर्तकधर्मविशेषो व्याप्त्यादिज्ञानजन्यज्ञानत्वरूपानुमितित्वादिस्तेन भिन्ना घटितायां मूर्तिः शरीरमनुमितिकरत्वादिरूपं य

स्य तादृशाकरत्वेनेत्यर्थः। तथा च विशिष्टबुद्धेर्विशेषणज्ञानं विनानुपपत्त्या पूर्वमनुमितिनिरूपितेति भावः। प्रांचस्तु नन्वनुमानस्य निरूप्यत्वेन प्रति

ज्ञातत्वादनुमितितन्निरूपणमर्थांतरग्रस्तमत आह। करणस्येतीत्यवतारयंति तन्मंदं। तावताप्यनुमितिकरणमनिरूप्य तद्घटिकाया अनुमितेः प्रथ॰

मतो निरूपणे॰ प्राप्तकालत्वतादवस्थ्यात्॥ किंच व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानकरणत्वेनानुमाननिरूपणे हेतुभूतस्य व्याप्त्यादिज्ञा
नजन्यज्ञानत्वेनानुमितिज्ञानस्य संपत्त्यर्थमेव यदि प्रागनुमितेर्निरूपणं तर्हि व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं तत्करणमनुमानमित्येव मणि
कारो ब्रूयात्तावतैव विशेषणज्ञानसंपत्तेः कृतमनुमित्याद्यभिलापेन ईदृक्स्येयमाशंका। अन्यथोसंगतेरुपजीव्योपजीवकभावश्चेत्यनेनाऽर्थां
तरनिरासादितिनुन वाच्य) आह मणिकारउक्तवानू व्याप्तीतिस्वार्तंत्र्येणरैं धारणं। यथाश्रुते व्याप्तीत्यनेन नक्रियालक्षणस्यैवोक्तत्वादसंगतेः॥ त
ल्लक्षणमित्यनंतरं वक्तुमिति पूरणीयं। आह। अनुमितिलक्षणमाहेत्यपि कश्चित्॥ क्रियालक्षणपूर्वकमनुमानरूपक्रियाविशेषलक्षणपूर्वक
मिति कः स्वार्थे) तथा चानुमानलक्षणपूर्वमित्यर्थः॥ तल्लक्षणमाह। अनुमितिलक्षणमाहाह्वचिदाकांक्षावैचित्र्येण समास्यैकदेशस्यापि तस्य
देन परामर्शादितिनुन व्याः॥ व्याप्तीत्यादिरुत्येष पाठइत्यन्ये। व्याप्तीत्यत्र इतिशब्देनादिपदार्थबोधकत्वमित्यपरे। तयोः सम्यक्त्वमेव यदि ध्वलग्रंथस्य

राम
१२

पुनरुद्धरणं संप्रदायसिद्धमिति॥ यन्नयत्युपाध्यायमतमुद्भावयति। अत्रेति। अर्थ इति परेणान्वयः। व्याप्तीति व्याप्तिसंबंधपक्षसंबंधयोः सामाना
धिकरण्यं संसर्गमर्यादया यदवगाहते वन्हिव्याप्तिवैशिष्ट्यवत्सर्वत्ववैशिष्ट्यवान्धूम इत्याकारकं वन्हिव्याप्तिवैशिष्ट्यवत्सर्वत्ववैशिष्ट्यं धूमे इत्याकार
कं वा ज्ञानं तज्जन्यत्वमित्यर्थः। पदार्थतावच्छेदकेति। नवक्रांतविशिष्टपदस्य वैशिष्ट्याश्रयबोधकत्वान्न व्याप्तिवैशिष्ट्याश्रयत्वमेव पदार्थतावच्छेदकं त-
त्प्रकारकं च ज्ञानं नोपाध्यायमते हेतुरिति वाच्यं। भावविहितक्तांतस्य विशिष्टपदस्य वैशिष्ट्यपरतया व्याप्तेर्वैशिष्ट्यं यत्रेति व्युत्पत्त्या व्याप्तिवैशि
ष्ट्यस्यैव व्याप्तिविशिष्टपदार्थतावच्छेदकत्वात्स्यादिति भावः॥ वचनत्वादिति। सामानाधिकरण्यसंबंधेन विशेषणतावच्छेदकविशिष्ट। स्य विशेष्य
तावच्छेदकस्यैव कर्मधारयोत्तरभावप्रत्ययार्थत्वादिति भावः॥ इत्थं च नीलोत्पलत्वमित्यादौ तादृशसंसर्गेण नीलत्ववदुत्पलत्वस्यैव तां वैशाभावप्र ६
त्ययार्थस्य प्रकृत्यर्थे नीलोत्पले ऽन्वयान्नीलोत्पलीयं नीलत्ववदुत्पलत्वमित्यन्वयबोधः। एतेन तादृशभावप्रत्ययस्य यदि सामानाधिकरण्येन

आ॰अ॰अ॰

१२

स्या

13

न शक्तिस्तदापदार्थतावच्छेदकयोरेकदेशतयातत्रान्वयासंभवः॥ यदि च तत्तत्पदार्थतावच्छेदकद्वयसामानाधिकरण्यत्वेन शक्तिस्तदा तादृ
शसामानाधिकरण्य(स्य)थवच्छेदकद्वयमात्रवृत्तित्वात्स्वत्वत्यर्थस्य तत्रानन्वयत्वप्रसंगः॥ कथंचिदवच्छेद्यत्वादिसंबंधेन प्रवृत्त्यर्थस्य तत्रान्व
यसंभवेप्युत्पलत्वे नीलोत्पलत्वमित्यादिव्यवहारप्रसंगः॥ तादृशसामानाधिकरण्यस्योत्पलत्वेपि सत्वात्। नीलोत्पलत्वं न समवेतमित्या
दिव्यवहारापत्तिश्चेत्यादिकं समाहितं। यत्तु तत्तद्विशेषणतावच्छेदकभेदादनंतशक्तिकल्पनापत्तेर्न कर्मधारयोत्तरभावप्रत्ययस्योक्त॰
रूपेण शक्तिः॥ किंतु वृत्तित्वमात्रे॰ तथा च नीलोत्पलत्वमित्यादौ भावसामान्यशक्त्योपस्थापितस्योत्पलत्वादेर्नीला न्वितवृत्तित्वेन सहान्व
या नीलवृत्त्युत्पलत्वं वाक्यार्थ इति। तत्तुच्छं। नीलोत्पलत्वमित्यादौ नीलोत्पलयोरभेदानुयस्य भवस्यापं॰ लापापत्तेः॥ वस्तुतो घटत्वमित्या
दौ घटेतरावृत्तित्वे सति सकलघटवृत्तित्वेन रूपेण घटत्वस्यानुभवः सर्वसिद्धस्तत्र घटस्य घटपदादेवलाभादितरावृत्तित्वादौ भावप्रत्यय

१२

शक्तिः। तत्रापि इतरत्वमाश्रयो वृत्तिमान् साकल्यं घटकीभूतप्रतियोगित्वमवच्छेदकत्वं च प्रत्येकमेवार्थः। तथा च प्रकृत्यर्थस्य घटस्येतर
त्वे तस्य चाश्रये आश्रयस्य वृत्तिमति वृत्तिमतः पुनरितरत्वे ऽन्वयाद्घटेतरावृत्तित्वलाभः॥ एवं प्रकृत्यर्थस्य घटस्य वृत्तिमति तस्य चेतरत्वे
इतरस्य च प्रतियोगित्वे प्रतियोगित्वस्य चावच्छेदके ऽवच्छेदकत्वस्य च पुनरितरत्वे ऽन्वयात् तद्घटवृत्त्यन्योन्याभावप्रतियोगितावच्छेदक
भिन्नत्वरूपस्य सकलवृत्तित्वस्य लाभः व्युत्पत्तिवैचित्र्यात्रैकपदार्थानां परस्परमन्वयः। न च विशिष्टस्यापदार्थत्वे प्रथमं विशिष्टवैशि
ष्ट्यान्वयबोधो नस्यादिति वाच्यम्। इष्टत्वात्। क्वाचित्कस्य प्रथमं विशिष्टवैशिष्ट्यबोधस्य विशिष्टलक्षणादितोऽप्युपपत्तेः। प्रकृत्यर्थेत
दवच्छेदकस्य यादृशसंबंधो भासते तादृशसंबंधावच्छिन्नं तु वृत्तिमत्वादिकं ग्राह्यं। तेन घटत्वादिजातेः कालिकालिकादिसंबंधेन घ
टेतरवृत्तित्वेपि न क्षतिः। न वा विषयितादिसंबंधेन घटत्ववतो भेदस्य घटवृत्तित्वेपि घटत्वादेर्घटवृत्त्यन्योन्याभावप्रतियोगितानवच्छे

आ॰अ॰अ॰

१४

14

दकत्वहानिः। सत्वं प्रमेयत्वमित्यादौ सद्भिन्नावृत्तित्वादेर्न भानं। अप्रसिद्धत्वात्। किंतु सद्वृत्तिभेदप्रतियोगितानवच्छेदकत्वादिरूपसक
लसद्वृत्तित्वादिमात्रभानम्॥ न चैवमपि घटत्वमित्यादितोऽभावस्य गगनादेर्लाभप्रसंगः। स्वातंत्र्येणापि वृत्तिमतोऽन्वयादिति। एवंच
नीलोत्पलत्वमित्यादिकर्मधारयस्थलेपि नीलाभिन्नोत्पलस्याभावप्रत्ययार्थेन सहान्वये निलत्वसमवायिसमावायरूपस्य पदा
र्थतावच्छेदकसामानाधिकरण्यस्य भानं भवत्येवं। न चोक्तरीत्याभावप्रत्ययस्य शक्तिकल्पने गुरुत्वमित्यादितो रसवत्वस्य संयोगव॰
त्वमित्यादितो द्रव्यत्वस्य तद्रूपवत्वमित्यादितो तद्रसवत्वस्य च॥ प्रतीत्यापत्तिः। प्रकृत्यर्थतावच्छेदकनिरूपितत्वविशिष्टप्रकृत्यर्थता॰
वच्छेदकत्वघटकसंबंधेन वृत्तिमत्वं स्यैव शक्यवर्गप्रवेशे तु तत एव निखिलातिप्रसंगभंगादितरावृत्तित्वादौ शक्तिकल्पनायां मानाभा
व इति वाच्यम्। ताद्रूप्येणानुभवानुरोधेन तत्र शक्तेः कल्पनात्। अख्यावर्तकस्यापि शक्यतावच्छेदकत्वादिति संप्रदायः केचित्तु धर्मत्वेनैव ध

शम

१४

र्मेभावप्रत्ययस्य शक्तिः। तत्र प्रवृत्त्यर्थतावच्छेदकनिष्ठाधेयत्वसंबंधेनैव प्रकृत्यर्थान्वयस्य च व्युत्पन्नत्वात्। घटत्वमित्यादितो न द्रव्यत्वादेर्भानं।
न वा पटादौ घटधर्मस्य द्रव्यत्वादेः सत्वेपि घटादौ घटत्वं नास्तीति वाक्यस्यायोग्यत्वमित्याहुः। तन्तुच्छं। घटे घटत्वमित्यादिवाक्यस्य निराकांक्ष
त्वापत्तेः। घटधर्मत्वावच्छिन्ने घटे वृत्तित्वान्वयबुद्धेरुद्देश्यतावच्छेदकविधेययोरैक्यस्यावश्यकत्वात्। नव्यास्तु घटवत्वमन्यत्वमित्यादि मुख्यप्र
योगसंभवाल्लाघवेन घटत्वादिकजातिर्भेदत्वादिकमखंडोपाधिश्च भावप्रत्ययस्य शक्यतायावच्छेदकं। घटत्वमित्यादौ घटत्वत्वादिप्रकारेण
लक्षणयैव बुद्धेरित्याहुः। तन्मंदं। तथा सति घटवत्वमित्यादौ प्रकृत्यर्थस्य घटवदादेर्भावार्थघटादावाधेयत्वसंबंधेनान्वयस्यानुपपत्तेः। घ
यादि विशिष्टघटादेरिव घटादौ घटादिमद्वृत्तित्वस्यान्वयस्य निराकांक्षत्वात्। घटवान् घटवानित्यत्रेव घटवति घट इत्यादावप्यन्वयबोधा
नुत्पादस्य सर्वसिद्धत्वादिति संक्षेपः। ननु वह्निव्याप्तिवैशिष्ट्यवत्पर्वतवृत्तित्वावद्रव्यत्वं मित्येवं परामर्शजन्यानुमितावव्याप्तिः। तत्र व्याप्तिविशि॰

ष्टत्वसमानाधिकरणपक्षधर्मतायाद्रव्यत्वेऽभावादत आह। ज्ञानेति। भ्रान्तानुमितिः भ्रान्तस्यानुमितिः। तथाच तत्रव्याप्तिविशिष्टत्वसमा
नाधिकरणं यत्पर्वतवृत्तित्वं पर्वतरूपादौ प्रसिद्धं तस्य द्रव्यत्वाद्यारोपमादाय लक्षणसंगम इति भावः॥ यद्वा ननु कांचनमयपर्वतो वह्निमा
नित्याद्यनुमितावव्याप्तिः। तादृशपक्षवृत्तित्वाप्रसिद्धेरत आह ज्ञानपदेति। तथा च त्रत्वादिव्याप्तिविशिष्टत्वसमानाधिकरणतत्तद्धर्मवृ
त्तितायास्तत्तद्रूपावच्छिन्नवृत्तित्वत्वेन ज्ञानजन्यज्ञानत्वं तत्तद्रूपावच्छिन्नतत्तद्धर्मिकत्रत्वादिसाध्यकानुमितेर्लक्षणमिति भावः॥ यत्तु ह्रदो
वह्निमान् धूमादित्याद्यव्याप्तिविशिष्टत्वसमानाधिकरणह्रदधर्मत्वाप्रसिद्ध्या तज्ज्ञानासंभवाद्व्याप्तिरत उक्तं ज्ञानपदेत्यादि। तन्तुच्छं। तत्र तादृश
सामानाधिकरण्याप्रसिध्या तज्ज्ञानासंभवस्यानुपदवक्ष्यमाणत्वेन संदर्भविरोधात्। केचित्तु बाधिताबाधितसाधारणेत्यस्य सदसत्साधारणेत्य
र्थः तथाच सदुपरागेणासतो भानस्य टीकाकृता स्वीकारादसदेवसामानाधिकरण्यमादाय ह्रदो वह्निमानित्यनुमित्यव्याप्तिनिरासाभिप्रा

यकोपंग्रंथ इत्याहुः॥ परेतु यत्र वन्हिव्याप्तिविशिष्टत्ववद्गुणसंयुक्तत्ववान्धूम इत्यादि परामर्शाद्गुणो वन्हिमानित्यनुमितिस्तत्रा व्याप्तिः गुण
संयुक्तत्वरूपस्य पक्षधर्मस्योक्तेप्रसिध्यातज्ज्ञानासंभवादतआह। ज्ञानेति। बाधिताबाधितेत्यस्य सदसत्साधारणस्य पक्षवृत्तित्वस्यज्ञा
नलाभादित्यर्थ इत्याहुः। तन्मंदं असदुपरागेणासतः संसर्गमर्यादयैव भानस्य टीकाकृतादि प्राचीनसंमतत्वेन प्रकारविधयापि अलीक
स्यगुणसंयुक्तत्वादेभानासंभवात्। अन्यथा परमताविशेषप्रसंगात्। इति। नव्यास्तु ननु बाधकालीनस्य परामर्शस्यानुव्यवसायेतिव्याप्तिः
नचाप्यज्ञाने बाधितंविशेषणं। अप्रामाण्यज्ञानविशिष्ट बाधकालीनस्य परामर्शजन्यानुमितावव्याप्तिप्रसंगादतआह। ज्ञानेति। बाधि
ताबाधितेति बाधिताबाधितसाधारणपरामर्शत्वेन ज्ञानस्य कारणत्वलाभादित्यर्थः। तथा च तादृशकारणत्वं लक्षणे निविष्टमिति नाति
व्याप्तिः। अतएव बाधितमपि साधुसंगच्छत इति प्राहुः। केचित्तु ननु च परमज्ञानपदस्य प्रमापरत्वे भ्रमानुमितौ भ्रमपरत्वे च प्रमानुमितावव्या

प्तिरतदुक्तज्ञानेतिक्रमेप्यावतरणिकामाहुः। तन्त्रिंत्यसं। तादृशपक्षधर्मतापाज्ञानमात्रनिवेशे धूमवान्पर्वत इतिलंबनजन्यानुमितौ लक्षण
समन्वयेपि वन्हिव्याप्यधूमवान्पर्वतइत्याद्याज्ञानजन्यबुद्धावतिव्याप्तिरतस्तादृशसामानाधिकरण्यावगाहिज्ञानं निवेश्यमित्याशयेनदूष
यति। परामर्शेनेति। अनुमितिजनकज्ञानेनेत्यर्थः। नियमतइत्यादि। तथाच वन्हिव्याप्तिसंबंधविशिष्टपर्वतसंबंधावान् धूमो वन्हिव्याप्यधूम-
वांश्चपर्वतइत्यादिसमूहालंबनजन्यानुमितौ लक्षणसमन्वयेपि वन्हिव्याप्यधूमवान्पर्वतइत्यादिधीजन्यप्रमानुमित्यव्याप्तिरिति भावः। ननुव्या
प्तिसंबंधविशिष्टपक्षसंबंधः निश्चयत्वेनानुमितिहेतुत्वादुक्तस्थलेऽनुमितिरेवासिद्धा कुतोऽव्याप्तिरतआह। गौरवेणेति। लाघवात्पक्षवृत्तौ
व्याप्तिवैशिष्ट्यनिश्चयत्वेनपक्षे वा व्याप्तिविशिष्टवैशिष्ट्यावगाहिनिश्चयत्वेनहेतुत्वादिति भावः। ननुव्याप्तिविशिष्टबुद्धित्वं न व्याप्तिसंबंधा
वगाहि बुद्धित्वं व्याप्तितत्संबंधादिसमूहालंबनादप्यनुमित्यापातात्। किंतुव्याप्तिसंबंधसंबंधावगाहित्वमेव तत्कुतो लाघवमतआह। संबं-

धेत्यादि। तद्विशिष्टबुद्धित्वं तत्प्रकारिताकज्ञानत्वं न तु पूर्वोक्तसंबंध। संबंधावगाहित्वं संबंधसंबंधावगाहिसमूहालंबनेतिप्रसक्तत्वात्। प्र
कारिताच विषयिताविशेषः स च स्वरूपसंबंधः पदार्थांतरं वा। अन्यथा दंडी पुरुष इत्यादौ दितो दंड पुरुषसंयोग इत्यस्या वैलक्षण्यापत्तेः।
अत एवाधिकरणाभावयोः संबंधस्वरूपानतिरेकेपि तदीयसमूहालंबनविशिष्टबुध्योर्भेदः। न च तुल्यविषयकत्वेपि विषयितावैलक्षण्ये
न बुद्धिभेदे साकारवादापत्तिरिति वाच्यं। वास्तववस्तुनाप्रामाणिकतया उपहतोनुमत्याकथत्वादित्यादि बौद्धाधिकारटिप्पण्यां स्वयमुक्तत्वा
दिति प्रांचः। तन्मंदं। विशिष्टबुद्धेः संबंधसंबंधावगाहित्वमतोपि व्याप्तिविशिष्टबुद्धित्वापेक्षया व्याप्तिसंबंधविशिष्टबुद्धित्वस्य गुरुत्वया
तुल्यत्वायोगादिति। नव्यास्तु ननु व्याप्तिप्रकारकपक्षधर्मताज्ञानं नानुमितिजनकं व्याप्तिसंबंधपक्षसंबंधयोस्सामानाधिकरण्यावगा
हिताकान्यत्वात्। इत्यनुमानादुक्तं गौरवं प्रामाणिकमेवेत्यत आह। संबंधेत्यादि। व्याप्तिसंबंधपक्षसंबंधयोः सामानाधिकरण्याग्रहेपी।

त्यर्थः।विशिष्टज्ञानत्वस्य विशिष्टस्य ज्ञानत्वं यत्रेति व्युत्पत्त्या अनुमितिजनकीभूतविलक्षणज्ञानस्योपयादितत्वात् उमिश्रादिभिरुपया
दितत्वादित्याहुः। ननु व्याप्तिविशिष्टत्वसमानाधिकरणपक्षधर्मतायाविशिष्टवैशिष्ट्यनिरूपितविषयिताविशेषणज्ञानपदार्थेऽन्वयादि
लक्षणज्ञानत्वाभावान्नवह्निव्याप्यधूमवान्पर्वत इत्यादिधीजन्यभ्रमानुमित्यव्याप्तिरत आह भ्रमस्थल इति। तज्ज्ञानेति। व्याप्तिविशिष्टत्वस-
मानाधिकरणपक्षधर्मताज्ञाने इत्यर्थः। तथा च ह्रदो वह्निमानित्यादिभ्रमानुमित्यव्याप्तिरिति भावः। अथासदेव वह्निव्याप्तिविशिष्टत्वसमा
नाधिकरणं ह्रदे वृत्तित्वं भ्रमस्थले प्रसिद्धमत आह। असदिति। अलौकिकचक्षुःसन्निकर्षादिः व्याप्त्याद्यंशे त्वादेश्यविरहेण प्रत्यक्षादिप्रमा-
णतः असतो व्याप्त्यसंभवात्। सत्त्वे चासत्त्वव्याघातात्। विनापि प्रमाणं व्यापारं तदभ्युपगमे च शशविषाणादिप्रतीतिदशायां वंध्यासुतादे
रपि ग्रहप्रसंगात्। अगृहीतशशादिपदशक्तिकस्य पुंसः शशविषाणमित्यादिप्रतीत्यनुपपत्त्या कूर्मशशादिविषाणतामादाय भ्रमत्वेनै

वत्वादृशप्रतीत्युपयत्वावतिरिक्ताखंडालीकविषयत्वे मानाभावात्तु शशविषाणस्यादिव्यवहारस्यापार्थकत्वात्तु शशे विषाणमस
दित्यादिस्थले चासत्ख्यातिस्स्यादत्यंताभावप्रतियोग्यर्थकत्वादिति भावः ॥ न चासतोऽप्रसिद्ध्या तत्ख्यातिनिषेधस्यायोगः तदीयसंसर्गत्वा
वच्छेदेन तत्प्रमात्वघटकत्वोपगमेनार्थतस्तन्निरासात् तु लक्षणाव्याप्तिमुक्त्वा लक्षणवाक्यतः शाब्दबोधोप्यनुपपन्न इत्याह । अवां
तरेति अयोग्यतासंशयस्य । प्रतिबंधकत्वादुक्तं निश्चय इति । तथा च हृद धर्मतानव्याप्तिविशिष्टत्वसमानाधिकरणे अतिवांतरवा॰
क्यार्था + नेन्वयास्तु लिंगासंसर्गाग्रहाल्लैंगिकासंसर्गाग्रहस्योपेयत्वात् भ्रमस्थलेऽनुमित्यनुत्पत्तेः कुत्राव्याप्तिरनत्राह । असदिति । अ
सतः प्रमापरामर्शादनुत्पन्नस्य ख्यातिनिरासादनुमितिभिन्नत्वनिरासादिति वदंति + योग्यत्वनिर्णये तादृशपक्षधर्मतायाः न ज्ञानपदा
र्थेऽन्वयः संभवतीति भावः । अत्रैव दृष्टांतयति । विषाण इति । विषाणत्वावच्छेदेनेत्यर्थः । शशासंबंधेति । शशविषाणेस्त्यत्र तत्पुरुषे शश

पदेन लक्षितस्य शशसंबंधिनः तादात्म्येन विषाणेऽन्वये शशासंबंधिभेदग्रहस्येव शशासंबंधाभावग्रहस्यापि स्वतो विरोधित्वात् शश
शसंबंधाभावेत्यस्यैव वा शशासंबंधेनाभाव इति व्युत्पत्त्या शशासंबंधावच्छिन्नप्रतियोगिताकभेदोऽर्थः। तथा विषाणजन्यमिदं कार्मुकमिति
वाक्यस्थलीयान्वयबोधाभिप्रायेणेदम्। निपातेयाकरणमते शशाविषाणमित्यादिवाक्यतः शशासंबंधवद्विषाणमित्याकारकबोधस्ते
लुप्तविभक्तिप्रतिसंधानस्यान्वयसहकारित्वस्वीकारात्। अर्थस्य शशासंबंधादेः साक्षादेव विषाणादिना मार्थेऽन्वयसंभवादिति तु परमार्थः
। नानामार्थयोर्भेदेनान्वयबोधस्य समासातिरिक्तस्थल एव व्युत्पन्नतया मणिकृन्मते ससमासयोः तुल्यार्थकत्वसंपत्तये शशापदस्य
शशासंबंधपरतया वा तादृश एव बोध इति तु नव्याः। न चेति। वाच्यमिति परेणान्वयः। भ्रमैवेति। प्रकृतपक्षधर्मिकप्रकृतसाध्यकप्रमानुमि
तिरेवेत्यर्थः। तेन ह्रदो वह्निमानित्यादिभ्रमानुमितेरप्यंशतः प्रमाणत्वेऽपि न क्षतिः। प्रमापदस्य भ्रमसामान्यभिन्नार्थकत्वे ह्रदः पर्वतश्च वह्नि

पदेन लक्षितस्य शशसंबंधिनः तादात्म्येन विषाणेऽन्वये शशसंबंधिभेदग्रहस्येव शशसंबंधाभावग्रहस्यापि स्वतो विरोधित्वात् । श-
शसंबंधाभावेत्यस्यैव वा शशसंबंधेनाभाव इति व्युत्पत्त्या शशसंबंधावच्छिन्नप्रतियोगिताकभेदोर्थः । तथा विषाणजन्यमिदं कार्मुकमिति
वाक्यस्थलीयान्वयबोधाभिप्रायेणेदम् । निपावेयाकरणमते शशविषाणमित्यादिवाक्यतः शशसंबंधवद्विषाणमित्याकारकबोधस्ते-
र्लुप्तविभक्तिप्रतिसंधानस्यान्वयसहकारित्वस्वीकारात् । अर्थस्य शशसंबंधादेः साक्षादेव विषाणादिना मार्थेऽन्वयसंभवादिति तु परमार्थः
। तानामार्थयोर्भेदेनान्वयबोधस्य समासातिरिक्तस्थल एव व्युत्पन्नतया मणिकृन्मते ससमासयोः तुल्यार्थकत्वसंपत्तये शशपदस्य
शशसंबंधपरतया वा तादृश एव बोध इति तु नव्याः । नचेति । वाच्यमिति परेणान्वयः । भ्रमैवेति । प्रकृतपक्षधर्मिकप्रकृतसाध्यकप्रमानुमि-
तिरेवेत्यर्थः । तेन ह्रदो वह्निमानित्यादिभ्रमानुमितेरप्यंशतः प्रमाणत्वेपि न क्षतिः । प्रमापदस्य भ्रमसामान्यभिन्नार्थकत्वे ह्रदः पर्वतश्च वह्नि-

मानित्यादिसंमूहालंबनानुमितेरप्यलक्ष्यत्वापत्तेः। इष्टापत्तौ पाध्यायमतेपि तादृश समूहालंबनानुमितावेवातिप्रसंगसंभवादग्रेयदिचेत्य
भिधानस्यसंदर्भविरोधादितिभावः। सल्लिंगपरामर्शादित्यत्र सल्लिंगपरामर्शमात्रादित्यर्थइत्यपिवदंति ननुभ्रमस्यालक्ष्यत्वेपृथिवीत्वादि
हेतुतायांगंधप्रागभावावच्छिन्नघटेगंधवानित्यादिभ्रमानुमितौ महानसीयत्वविशिष्टसहकृततायथार्थवन्हिपरामर्शाज्जायमाना
यांपर्वतोमहानसीयवन्हिमानितिभ्रांतानुमितौचातिव्याप्तिरतआह। यदिचेतिदि। पक्षतावच्छेदकसमानाधिकरण्येनैवगृहीतव्या
पकतावच्छेदकरूपेणेवपक्षेसाध्यस्यानुमितिरित्युपाध्यायमतमवलंब्योक्तं यदिचेति। प्रथमज्ञानपदस्य प्रमापरत्वेतद्दोषतादव
स्थ्यमतः प्रवरमेति। प्रमापरमिति। प्रकृतपक्षधर्मिकप्रकृतसाध्यवत्ताप्रमापरमित्यर्थः। तेनन्हृदो वन्हिमान्पर्वतश्चवन्हिमानितिभ्रमा
नुमितेरंशतःप्रमत्वेपिनतत्रातिव्याप्तितादवस्थ्यं। यत्रव्याप्तिविशिष्टसमानाधिकरणपक्षधर्मत्वस्यहेतौनभ्रमः किंतुस्वधर्महेतौ

व्याप्यत्वमात्रस्य व्याप्तेर्वा हेतौ पक्षधर्मत्वमात्रस्य भ्रमत्वात्तादृशपरामर्शजन्यप्रमायामव्याप्तिमाह। अव्याप्तेरित्यादिना। वस्तुतः वस्तुगत्या
तथा च वह्निव्याप्यद्रव्यत्ववान् तादृशमहानसत्ववान् पर्वत इत्याकारः। परामर्शो यत्र द्रव्यत्वगतमेव पक्षधर्मत्वं महानसत्वगतमेव व्या
प्यत्वं विषयीकरोति तत्रत्यायां पर्वतो वह्निमानिति प्रमायामव्याप्तिरिति भावः। नन्वनुमितिमात्रस्यैव साध्यव्याप्यवत्पक्षावगाहित्वा
दुक्तस्थलीयानुमितिर्लिङ्गांशे भ्रमरूपैव सा च न लक्ष्या भ्रमसामान्यभिन्नत्वस्यैव रूपस्यैव प्रमाणत्वस्य लक्ष्यलक्षणयोर्निवेश
नीयत्वात्। पर्वतो ह्रदश्च वह्निमानिति समूहालम्बनानुमितेरलक्ष्यत्वेऽपि क्षत्यभावात् कुतो व्याप्तिरत आह। हलिङ्गेति (पृ) हि तेलिं
ङ्गविशिष्टपक्षे लैङ्गिकस्य साध्यस्य भाननिरासेन। तथा चाचार्यानुमाननिरासे (ते) साधकाभावादित्यादिः। न च धूमादिपरामर्शजन्य
तावच्छेदकतयैवानुमितेर्वह्निव्याप्यधूमादिविषयकत्वसिद्धिः। अन्यथा विनापि धूमादिपरामर्शमालोकादिपरामर्शाद्दृत्यनुमित्युत्प

त्वाव्यभिचारायत्तादिति वाच्यं। तावतापि द्रव्यत्ववत्पर्वतधर्मिकव। त्वनुमितित्वावच्छिन्नं प्रति त्वेव वन्हिव्याप्यद्रव्यत्ववत्तानिश्चयत्वे
नं हेतुतया तादृशानुमितेश्चाप्रमात्वनियतत्वेन तत्र व्याप्तित्वादवस्थ्यात्। लाघवादेकविधव्याप्तेरेवानुमितिप्रयोजकत्वस्य व्यव
स्थ्यापयत्वादिति भावः। परे तु प्रत्यनुमितौ उपनीतकाञ्चनमयत्वादेरिव वत्वांशे धूमादेरपि प्रकारतया भानात्तादृशानुमितिर्भ्रमरूपैवेत्यत
आह। लिंगेति। अनुमितिमात्रस्यैव भ्रमत्वेन लक्ष्याप्रसिद्धेरित्यादि। लिंगोपहितं लिंगविशिष्टं यल्लैंगिकसाध्यं तस्यानुमितौ प्रका
रत्वनिरासे तेत्यर्थ इति प्राहुः। अपरे तु लिंगेति लिंगं लिंगतावच्छेदकं तदुपहिते तद्विशिष्टे। लैंगिकस्य साध्यीयव्याप्यत्वस्य भाननि
रासे न द्रव्यत्ववान्पर्वतो वन्हिमानित्यौकानुमितौ आंशिकभ्रमत्वस्याप्ययोगादित्यर्थ इत्यप्याहुः। ननु पक्षस्य वस्तुगत्या साध्यत्वे
व तत्रेश्वरस्य व्याप्तिविशिष्टत्वसमानाधिकरणपक्षधर्मताज्ञानस्य जन्यतासत्वांशे व्याप्तिरतस्त्वाह। ईश्वरेति। अतिप्रसंजकत्वात्तु वन्हिप्र

कार

त्पक्षादिसाधारणत्वात्। तथा च तादृशज्ञानत्वाद्यवच्छिन्नमेव जनकत्वं लक्षणे प्रवेश्यं। तच्च प्रकृतानुतानुमितावीश्वरज्ञानस्य नास्ती
ति भावः। यद्यपि व्याप्तिविशिष्टत्वसमानाधिकरणपक्षधर्मताया विषयिताविशेषेण ज्ञानेन्वयात्। तादृशज्ञानमेव लक्षणे प्रविष्टं। अ
न्यथा परामर्शेन नियमतउक्तदोषतादवस्थ्यात्। तत्र च प्रकृतसाध्यीयव्याप्तिनिवेशो मानाभावात्। यत्किंचित्पदार्थीयव्याप्तिवि
शिष्टत्वसमानाधिकरणपक्षधर्मताया विषयिताविशेषेण ज्ञानमादाय लक्षणसंभवात् न कुत्राप्यव्याप्तिसंभावना। तथापि प्रकृतव्या
प्तिविशिष्टवैशिष्ट्यानिरूपितविलक्षणविषयितासंबंधेन धर्मत्वस्यैव ज्ञानपदार्थेन्वयात्सर्वसामंजस्ये पक्षपदार्थपर्यंतप्रवेशवैयर्थ्या
त्रैवमन्वयो वाच्य इत्याशयः। न च साध्यादिभेदेन व्याप्तेर्भेदादेकोपादानेन्यसाध्यकानुमित्यव्याप्तिरतो जातिगर्भत्वध्रौव्येन कुत्रा॰
प्यव्याप्तिरिति वाच्यं। तत्सक्षकत्वतत्साध्यकानुमितित्वेन विशिष्यैव लक्ष्यतया जातिघटनाया अनावश्यकत्वात्। एकविधव्याप्तेरेव सर्व

त्रानुमितौ हेतुत्वादित्याशयादिति। अत एव उक्तानुमित्यव्याप्तेरेव। विशेषविभक्तिं विना कारकविभक्तिमत्त्वं भाव्यैव तत्पुरुषस्य व्युत्पन्नत्वा
दाह। तज्ज्ञानं वेति। व्याप्तिविशिष्टे यत्पक्षधर्मताज्ञानमिति ज्ञानान्तं तत्पुरुषोऽपीनेत्यर्थः। आदिपदाद्व्याप्तिविशिष्टत्वसमानाधिकरणाया
पक्षधर्मतेत्यादिकर्मधारयपरिग्रहः। मिश्रमतमुपन्यस्यति। व्याप्तिविशिष्टमिति। अत्र चार्थे द्वंद्व इति पाणिनिसूत्रेण चार्थे समस्यमा
नपदार्थयोर्भेदे द्वंद्वस्य विधानादुक्तवाक्यतः सल्लिंगपरामर्शो लाभस्तत्र व्याप्तिविशिष्टस्यैव पक्षधर्मतया तदुभयोर्भेदविरहादत
आह। पदार्थयोरिति। न्यायसूत्रे द्वादशविधस्यैव प्रमेयस्य प्रविष्टत्वात्तस्य भेदः प्रमाणेऽस्त्येवेत्यत आह। अन्यत्र चेति। अन्यत्र नील
घटयोरभेद इत्यादिवाक्ये। तथा च सूत्रेऽपि चार्थो भेदः समस्यमानपदप्रतिपाद्यतावच्छेदकयोरेव ग्राह्यः स च प्रकृतेऽपि व्याप्तिविशिष्टत्वप
क्षधर्मतयोर्भेदोऽस्त्येवेति भावः। ननु पदार्थतावच्छेदकभेदेन द्वंद्वविधाने घटाविद्यादिसरूपैकशेषो न स्यात् द्वंद्वापवादकस्य तस्य द्वंद्वाप्र

सत्त्वाव संभवात्। नच पदवोध्यभेद एव द्वंद्वस्तथा च घटावित्यत्रापि घटपदवोध्यानां घटव्यक्तीनां परस्परभेदसत्वान्तत्र द्वंद्वापत्ति-
रिति वाच्यं। तथा सति घटकलशावित्येवमपि द्वंद्वप्रसंगात्। अनुशासनाभावेन तत्रैकशेषस्य कर्तुमशक्यत्वादिति चेन्न। तत्र
सरूपैकशेषासत्त्वेपि क्षत्यभावात्। यत्र विष्णुत्व सिंहत्वादिकं विभिन्नमेव हरिपदार्थतावच्छेदकं तत्रैव तत्संभवात्त्वेतिदिक्। अत्र त्व
नीलघटयोर भेद इत्यादिस्थले विभक्त्युपस्थाप्यद्वित्वादिकं न विशेष्यान्वितं तस्यैकत्वेन बाधत्। नापि विशेषणीभूते नीलत्व
घटत्वादावन्वितम्। तयोः पदार्थतावच्छेदकत्वेनाकांक्षाविरहात्। किंत्वनन्वितमेव। नचैवं द्विवचनवैयर्थ्यं। दाराइत्यत्र बहुवचनवत्
साध्यत इत्येकवचनवत्साधुत्वार्थमेव तदुपयोगादिति ध्येयं। स्वामिनो दे वृंदे वराविस्यत्रैव व्युत्पत्तिवैचित्र्यात्पदार्थतावच्छेदकेपि विभ
क्त्यर्थस्य द्वित्वादेरन्वयः। अत एव जात्याकृतिव्यक्तयः पदार्थ इति न्यायसूत्रे पदार्थ इत्येकवचनं शास्त्रयन्व यीति वार्तिकं व्याख्यातमिति

चिद्वदंति। ननु पदार्थतावच्छेदकयोर्भेदेन द्वंद्वविधाने नीलोत्पलमित्यादिकर्मधारयस्थलेपि तदापत्तिरत आह। पदार्थेति। भेदस्तादात्म्या
तिरिक्तः संबंधः। अभेदस्तादात्म्यं। तथा चैकपदार्थधर्मिकपदार्थांतरवैशिष्ट्यविषयत्वाबहिर्भूतविभिन्नधर्मावच्छिन्नपदार्थद्वयविषयता
कबोधजनकत्वेत्यर्थः। तेनैकदा नीलोत्पलमित्यस्य द्वंद्वकर्मधारयोभयसत्वेपि न क्षतिः। भेदात्त्भेदव्यवहारात्। पदार्थयोर्भेदे द्वंद्वविधा
नेपि न क्षतिरित्याह। विशिष्टपदस्येति। केचित्तु ननु व्याप्तिविशिष्टपक्षधर्मयोर्द्वंद्वे विशेषविधिं विनाऽल्पस्वरस्य पक्षधर्मस्य विशेषवि
धिना पूर्वनिपातापत्तिरत आह। विशिष्टपदस्येत्यपि कश्चित्। ननु व्याप्तिविशिष्टेन पक्षधर्मता द्वंद्वे वन्हिव्याप्यद्रव्यत्ववान्पर्वतइत्यादिपरा
मर्शेन व्याप्तिविशिष्टस्याविषयीकरणात्तत्रात्यानुमितावव्याप्तिरतो वैशिष्ट्यपरतामाह। धर्मेति। वैशिष्ट्यपरतयेत्यर्थः। न च विशिष्टप
दस्य तत्परत्वं न लक्षणया तस्य वाक्यत्वेन शक्त्यभावादिति वाच्यं। धातोरेव शक्त्या वैशिष्ट्यपरत्वात्। भावविहितक्तप्रत्ययस्यानिरर्थकत्वात्।

भावविहितक्तप्रत्ययस्यनिरर्थकत्वात्।एतावताप्यवेदयितुमेवप्रागपिविग्रहवाक्येव्याप्तिविशिष्टमितिक्लीबनिर्देशः क्तनपुंसकेभावेक्त
इत्येवानुशासनादितिभावः।क्तत्वादिति।तत्रव्याप्तिविशिष्टेत्यादिमूलस्थतच्छब्देनैवधर्मिणोमूलकृतोक्तत्वादित्यर्थः।उक्तत्वाद्विवक्षित
त्वादित्यपिकेचित्।द्रव्यमिति।तत्रव्याप्तिविशिष्टधूमस्यैवद्रव्यत्वेनपक्षेधर्मत्वावगाहनादितिभावः।मीमांसकेति।मीमांसकैरनुमितित्वेना
भिमतेज्ञानेप्रोक्तलक्षणस्यानुप्रवेशात्।गतत्वादित्यर्थः।तथाचवन्हिव्याप्यवान्पर्वतइत्यादिपरामर्शजन्यानुमितावव्याप्तिः।जातिगर्भ
तयावारणेपिवन्हिव्याप्योधूमाधूमवांश्चपर्वतइत्याकारकसमूहालंबनस्यानुव्यवसायेति।व्याप्तिरितिभावः ननुव्याप्तिसंबंधपक्षसं
बंधयोःपरस्परवैशिष्ट्यावगाहित्वंवाच्यं।तथाचोक्तसमूहालंबनस्यातथात्वान्नोक्तातिव्याप्तिरतआह।मिथइति।अव्यापकत्वात्।वन्हिव्या
प्यधूमवान्पर्वतइत्यादिज्ञानएवासत्वात्।तथाचतादृशपरामर्शस्थलीयानुमित्यव्याप्तिरितिभावः।लक्षणस्थंजन्यपदंजन्यताविशेष

परमतो धूमो वह्निव्याप्यो द्रव्यं पर्वतवृत्तीत्यादिज्ञानजन्ये नातिव्याप्तिरित्याशंक्य निराचष्टे। नचेति तदुभयविषयकत्वनियतेति। व्याप्ति
संबंधविषयकत्वाभावस्य तादृशविषयकान्यत्वस्य वा पक्षधर्मताविषयकत्वाभावस्य तादृशविषयकान्यत्वस्य वाधिकरणवृत्तीत्यर्थः
व्याप्तिविशिष्टत्वपक्षधर्मत्वोभयविषयकत्वनियतो यो धर्मः परामर्शत्वं तदवच्छिन्नप्रकारतानिरूपितकार्यत्वमस्त्यनुमिताविति तत्र
लक्षणसत्वं। परामर्शाद्यनुव्यवसायेतु न परामर्शत्वादिना हेतुत्वं किंतु प्रत्यक्षमात्रे विषयत्वेन। नचैवं तदुभयविषयकत्वं नियतं
घटज्ञानादौ व्यभिचारात्। तत्तत्परामर्शप्रत्यक्षे विषयविधया घटादिस्मृतौ चोद्बोधकविधया तत्तत्परामर्शव्यक्तित्वेन हेतुतासत्वेतु
धर्मपदं नानावृत्तिधर्मार्थकं वाच्यमिति भावः। वैयर्थ्यादिति। स्वव्यापकतदुभयविषयकत्वसामानाधिकरण्यात्मके तदुभयविषयकत्व ২
नियमे स्वव्यापकव्याप्तिविषयकत्वसमानाधिकरणधर्मावच्छिन्नत्वस्यैव सम्यक्त्वात्। तदुभयविषयकत्वाभाववद्वृत्तित्वलक्षणनि

यमस्यनिवेशोऽखंडाभावघटकतया पक्षधर्मताविषयकत्वस्य वैयर्थ्यविरहेप्यननतिप्रयोजनकत्वादित्येके कश्चित्‌। नच आप्तिविशिष्टबु
द्धौ व्याप्तिज्ञानत्वेन हेतुत्वात्तत्रातिव्याप्तिवारणार्थमेव पक्षधर्मताप्रवेशं तन्निवेशोपि आप्तविशिष्टपक्षवैशिष्ट्यबुद्धौ वतिव्याप्ति
रतस्तद्वारणार्थं चरमज्ञानपदस्य व्याप्यविषयकत्वेनावश्यं विशेषणीयत्वे तत एव व्याप्तिविशिष्टबुद्धाव व्याप्तिव्याप्ते निर्रासात्‌॥
नचैवं व्याप्यविषयकत्वे सति व्याप्तिज्ञानजन्यत्वं मित्यस्यैव सम्यक्त्वे व्याप्तिविषयकत्वनियतधर्मावच्छिन्नकारणत्वप्रवेशो व्यर्थ इ
ति वाच्यं। परमेश्वरीयव्याप्तिज्ञानजन्यस्य वन्ह्यादिप्रत्यक्षस्य वारकतयैव तस्य सार्थकत्वात्‌। यद्यपि पक्षधर्मताविषयकत्वनियतधर्माव॰
च्छिन्नकारणतेत्यादेरेव सम्यक्त्वात्‌ व्याप्तिपदोपादानवैयर्थ्यमित्यपि वक्तुं सद्यते। नचैवं धूमवत्पर्वतविशिष्टबुद्धावतिव्याप्तिः। चरमज्ञान
स्य पक्षधर्मताविषयकत्वेन विशेषणीयत्वे चासंभवः। अनुमितिमात्रस्यैव साध्यांशे पक्षसंबंधविषयकत्वादिति वाच्यं। साध्यादिभेदेन व्या

न्तेरिव पक्षादिभेदेन पक्षधर्मताया अपि भिन्नतया धूमवत्पर्वतविषयकत्वनियतधर्मावच्छिन्नकारणताकत्वे सति धूमवत्पर्वताविषयकज्ञानत्वं
मित्युक्तावसंभवविरहात्। तथाप्यभावाविषयकत्वपर्यवसन्नस्य व्याप्यविषयकत्वस्य चरमज्ञानविशेषणीयत्वे लाघवं। पक्षधर्मत्वाविषय॰
कत्वे प्रवेशे तु गौरवमेव त्वाविषयकत्वेनोक्तौ गौरवविरहेऽपि धूमवान्पर्वतो वन्हिमानित्याकारिकैवानुमितिरिति लिङ्गोपधानमतस्य प्रामाणि
कत्वे सर्वत्रैवोक्तप्रकारो न संभवतीत्याशयेन पक्षधर्मतापदस्य वैयर्थ्यमुक्तं। संशयत्वस्य कार्यतावच्छेदकत्वे साधारणधर्मदर्शनविधया
हेतुमत्तानिश्चयजन्ये साध्यादिसंशये तिव्याप्तिभिया व्याप्तिविशिष्टपदवैयर्थ्यं नोक्तमित्यपि कश्चित्। केचित्तु यत्र साध्यस्यैव हेतुत्वमनु
मितत्सया चानुमितिस्तादृशस्थलीयपक्षधर्मतामन्तर्भाव्योक्तक्रमेण लक्षणकरणस्यासंभवाद्व्याप्तिविशिष्टपदवैयर्थ्यं नोक्तमित्यप्याहुः। इति
तु स्यादिति। यद्यपि धूमो वन्हिव्याप्यो द्रव्यं पर्वतवृत्तीत्यादिज्ञानस्यापि निरुक्तरूपवत्त्वात्तदनुव्यवसायेतिव्याप्तिः। पक्षधर्मांशे व्याप्तिप्रकारक

त्वविवक्षणे तु मिश्रोक्तद्वंद्वपरित्यागनौचित्यं। तत्राप्युक्तविवक्षासंभवात्। तथापि व्याप्तिप्रकारकमित्यस्य व्याप्त्या प्रकारो यस्येति व्युत्पत्त्या व्या
प्त्यवच्छिन्नप्रकारताकमित्यर्थः। तथा च ज्ञानांतकर्मधारये ऽन्वयितावच्छेदकावच्छेदेन विधेयतावच्छेदकावच्छिन्नान्वयस्य व्युत्पत्तिसिद्धतया
पक्षधर्मतावगाहितावच्छेदेन व्याप्त्यवच्छिन्नप्रकारताकत्वस्य शाब्ददेवलाभात् विवक्षा द्वंद्वे तु स्वांतर्भावेण वृत्तिद्विवक्षणीयमिति पूर्वतो वैलक्षण्य
मिति भावः। आत्मपीत्यपिकारेण प्रागुक्तसकलसमासः समुच्चीयते। वन्हिव्याप्येंधनवानित्युक्तौ तु साध्यवदन्यावृत्तित्वरूपव्याप्तिमादाय
कदाचित्प्रसिद्धिं कुर्यादतो विशिष्य निर्दिशति। इंधनसमानाधिकरणेति। अखंडव्याप्तेरिति। यद्यपि तमोद्रव्यं रूपवत्त्वादित्यादौ तमःसमवेतत्व
रूपपक्षधर्मतस्याप्रसिद्धिरस्ति। तथाप्यग्रे पक्षे धर्मताज्ञानमिति ज्ञानांतत्वपुरुषेण तद्वारणादिति (व्याप्ति संभवात्।।) दनुतया न्यूनत्वमिति वाच्यं। य
श्चादादिपदेन तस्यापि वक्तव्यत्वादिति) ननु साध्यहेतुव्यापकतावगाहिता निरूपितं यद्धेतौ साध्यसामानाधिकरण्यावगाहित्वं तदेव व्याप्तिप्रका

रकत्वं वाच्यमतो नोक्ता व्याप्तिरित्यत आह। भ्रमानुमितेरिति। वृत्त्यनियामकसंयोगादिसंबंधेन साध्यहेतुभावेऽखंडव्याप्तेः प्रसिध्या तत्रत्यानुमिता
वव्याप्त्यसंभवाद्वृत्तिनियामकसंबंधेन साध्यत्वसाधनत्वयोः सूचनायात्रेत्युक्तं। स्फुटतरामिति। अव्याप्तिरितिपूर्वेणान्वयः। अत्र हेतुव्यापक
त्वसाध्यसामानाधिकरण्ययोरप्रसिध्या तदुभयावगाहित्वमंतर्भावयित्वापि लक्षणस्य कर्तुमशक्यमित्यव्याप्तिरेवेति भावः। तावदिति। प्रागुक्तक्र
मेणान्वयव्याप्तिघटकेत्यादिः। तथाविधमनुमित्युपयोगि यत्परस्परसंबंधावगाहित्वं विशिष्टवैशिष्ट्यविशेष्यविषयिताविशेषरूपं तदेव विवक्षि
तं व्याप्तिप्रकारकपदेनेत्यर्थः। तेन धूमस्याधिकरणमधिकरणवृत्तिरभाव इत्याकारकस्य तावत्पदार्थगोचरस्य समूहालंबनस्य व्युदासः। यद्य
प्यन्योन्याभावादिगर्भान्वयव्याप्तिज्ञानस्थलीयानुमितावप्यव्याप्तिः संभवति। अत्यंताभावगर्भान्वयव्याप्तिनिविष्टवस्तुनामेव तावत्पदार्थे
परामृष्टत्वात्। तथाप्यन्वयव्याप्तीनां मध्येऽत्यंताभावगर्भायाः सिद्धांतोक्तव्याप्तेरनुमित्युपयोगित्वमनुसृत्य शंकते। न चेति। व्यतिरेकिणीति। व्यति

रेकव्याप्तिज्ञानजन्यानुमिताविति इत्यर्थः। केचित्तु व्यतिरेकिणि निरुक्तावगाहितादृशान्यपरामर्शजन्यानुमिताविति इत्यर्थः। तथा चान्योन्याभावगर्भव्याप्त्य
वगाहिपरामर्शस्यापि संग्रहात् नोक्तदोष अग्रे विरोधप्रदर्शने संताभावप्रदर्शनमुपलक्षणमिति वदंति। अत्र परामर्शस्य पक्षे साध्याभाव
व्यापकीभूताभावप्रतियोगित्वेन हेतववगाहितया ऽन्वयव्याप्तिप्रकारकत्वाभावादिति भावः। व्याप्तिद्वये व्यभिचारधीविरोधित्वं ग्राहयति। भ
वति हीति। धूम इति। गृहीत इत्यग्रेणान्वितम्। ननु धूमव्यापकवन्हिसमानाधिकरणधूमसमानाधिकरणरासभवान्पर्वत इति ज्ञानसत्वेपि धूमे
व्यभिचारज्ञानानुदयात्। तस्यापि व्यभिचारज्ञाधीविरोधित्वमतस्तज्जन्यानुव्यवसायेति व्याप्तिरत आह। तथा विधेति। वन्हिव्याप्ये इत्यर्थः। नत
था। न पक्षधर्मतांशे व्यभिचारधीविरोधी तथा च तदवछिन्नविशेष्यकव्यभिचारधीविरोधिधीविषयप्रकारकतदवछिन्नवत्ताधीजन्यत्वम॰
र्थः। प्रागुक्तबुद्धिस्तु न रासंभत्वावछिन्नविशेष्यकव्यभिचारज्ञानस्य विरोधिनी धूमत्वावछिन्नविशेष्यकव्यभिचारधीविरोधित्वेपि न तस्य पक्ष॰

राम
२५

धर्मतयाभानमतो न दोष इति भावः। नव्यास्तु ननु धूमव्यापकवह्निसमानाधिकरणत्वमात्रमन्वयव्याप्तिस्तस्या न व्यभिचारधीविरोधित्वं धूमव्या
पकवह्निसमानाधिकरणो रासभ इति ग्रहेऽपि रासभो वह्निव्यभिचारीति प्रत्ययात्तत्कथं व्यभिचारधीविरोधित्वेन तदनुगम इष्यत उक्तं तथावि
धेति। तथाविधं धूमव्यापकवह्निसमानाधिकरणधूमत्वपर्यन्तं प्रागुक्तमिति प्राहुः। ननु साध्यसामानाधिकरण्यस्यापि व्यभिचारधीविरोधिधीवि
षयता यातत्प्रकारकवह्निसमानाधिकरणधूमवान्पर्वत इत्यादिज्ञानजन्येतदनुव्यवसायोदावति व्याप्तिः। यादृशविशिष्टविषयकत्वेन व्यभि
चारज्ञानं प्रतिविरोधित्वं तत्प्रकारकत्वोक्तौ चान्वयव्याप्त्यसंग्रहः। केवलं धूमव्यापको वह्निरिति ग्रहेऽपि धूमो वह्निव्यभिचारीति ज्ञानानुदयात्।
धूमत्वविशिष्टवह्निव्यभिचारग्रहं प्रति वह्नौ धूमस्य व्यापकतानिश्चयत्वेन प्रतिबंधकत्वध्रौव्ये व्याप्तिनिश्चयत्वेन पृथक् प्रतिबंधकताकल्प
नात्। वस्तुतः समानाकारज्ञानस्यैव प्रतिबंधकतया द्वयोरपि व्याप्तिबुद्ध्योर्व्यभिचारधीप्रतिबंधकत्वाभावादनुगमासंभवः। नच व्यभिचारधीप

देनान्वयव्याप्तेर्व्यतिरेकव्याप्तेश्चाभावविषयकज्ञानविशेषमुपादाय तद्बुद्धिप्रतिबंधकतावच्छेदकप्रकारिता॥ वेनान्वयव्यतिरेकव्याप्तिप्रका
रिताद्वयमनुगमय्य तादृशप्रकारितावच्छिन्नपक्षधर्मताज्ञानजन्यत्वमर्थ इति वाच्यं। धूमो वह्निव्याप्यो नेति बुद्धावधिकरणं न धूमीयमित्या
दिज्ञानस्यापि विरोधितया निर्धूमः धूमवान्पर्वत इत्यादिज्ञानस्यापि निरुक्तरूपवत्तायास्तज्जन्यानुव्यवसायादावतिव्याप्तेः प्रतिबंधक
तावच्छेदकादिभेदेन प्रतिबंधकत्वस्यैव भेदादेवमपि अनुगमस्य कर्तुमशक्यत्वात् इत्येतत्सर्वं सारदाह) व्यतिरेकेति। तथा च व्यतिरेकव्याप्ति
ज्ञानं हेतुरेव तत्कुतस्तज्जन्यानुमितावव्याप्तिरिति भावः। स्वयं व्यतिरेकि परामर्शजन्यानुमितेरापत्तिरुपगमेनाश्रयणादिति। आ
चार्यैराश्रयणादित्यर्थः अथ स्थाणुत्ववत्त्वयं नु स्थाणुः स्थाणुर्न वा इत्यादिभ्रमसंशयोत्तरं स्थाणुत्वव्याप्यवक्रकोटरादिमानयमित्या
दिविशेषदर्शनजन्ये अयं स्थाणुरित्यादिप्रत्यक्षेऽतिव्याप्तिः व्याप्तिविशिष्टपक्षधर्मत्वज्ञानजन्यत्वस्यापि तत्र सत्त्वादित्याशंकते नचेति। प्र

मशंशयेति। यद्यपि स्वमतेपि विशेषणज्ञानत्वेनोपनयविधया च विशेषदर्शनस्यासंशयोत्तरप्रत्यक्षे हेतुत्वाद्धेतुतामत इत्यसंगतं। तथा-
पि प्रत्यक्षादिज्ञानस्यापि कालोपाधिविधया परामर्शजन्यत्वात्तद्वारणार्थमेवावश्यं किंचिद्विशेष्यकत्वावच्छिन्नं पक्षीभूतपर्वतादिविशे-
ष्यकत्वावच्छिन्नस्यापरामर्शजन्यत्वमेव लक्षणे निवेश्यं तथा च तत्तत्प्रकारकबुद्धित्वावच्छिन्नं प्रत्येव तत्तद्विशेषणज्ञानत्वादिना हेतुत्वात्तत्त-
द्विशेषणज्ञानादिजन्यतायाः किंचिद्विशेष्यकत्वानवच्छिन्नत्वात्तामादाय दोषः किंतु संशयोत्तरप्रत्यक्षत्वाद्यवच्छिन्नजन्यतामादायैव-
तादृशजन्यतायां धर्म्यंतर्भावस्यावश्यकत्वादिति भावः। यत्तु कालोपाधिविधया परामर्शजन्यतामादाय प्रत्यक्षादावतिव्याप्तिनिराक-
र्तुं प्रमितिविभाजकोपाध्यवच्छिन्नमेव परामर्शजन्यत्वं लक्षणे निवेश्यं तादृशं च निर्विशेषणज्ञानजन्यत्वं विशिष्टबुद्धित्वेनैव तदवच्छेदेना-
दतो हेतुतामत इत्युक्तं। न च तथापि तदलौकिकप्रत्यक्षं तत्प्रकारकं तत्प्रकारकप्रत्यक्षं प्रत्येव वा तद्विषयकज्ञानत्वेन हेतुत्वाद्व्याप्त्युपनयजन्य

तामादायस्वमतेपिसंशयोत्तरप्रत्यक्षेऽतिव्याप्त्याहेतुतामुतदसंगतमेतिवाच्यंतादृशहेतुतायांमानाभावात्अप्रसिद्धसाध्यकानुमि
तेःसाध्यविशेषणकत्ववारणायतत्प्रकारकानुभवत्वावच्छिन्नंप्रत्येवतद्विषयकत्वज्ञानत्वेनहेतुत्वावश्यकत्वेततएवोपनीतप्रत्यक्षसंभवा
दितिमतंतच्चिंत्यं।एतावतापिभावस्यस्वच्छाणुत्वादेरलौकिकप्रत्यक्षत्वावच्छिन्नंप्रतितद्गोचरज्ञानत्वेनहेतुतायांबाधकाभावात्तदुपनीत
भानात्मकेसंशयोत्तरप्रत्यक्षेस्वमतेप्यतिव्याप्तिसंभवादभावसाध्यकानुमितिरेवाप्रसिद्धसाध्यकत्वेनाभावप्रकारकानुभवत्वावच्छिन्नं
प्रत्येवतद्गोचरज्ञानत्वेनहेतुत्वस्यक्लृप्तत्वादप्रसिद्धसाध्यकपरामर्शसाध्यविशेष्यकानुमितिंप्रत्येवहेतुत्वान्नतःसाध्याविशेषणकानुमितेरव
संभवाच्चेतिध्येयं।अत्रसंशयोत्तरप्रत्यक्षेविशेषदर्शनस्यहेतुत्वेमानाभावः।विशिष्टबुद्धिसामान्यसामग्रीतएवसंशयाद्युत्तरप्रत्यक्षस्यापि
संभवादेककोटिविशेषदर्शनस्यापरकोटिविशिधीप्रतिबंधकतयोपयोगात्।नचैवंतदीयसंशयोत्तरप्रत्यक्षंप्रतितदीयविशेषदर्शनस्याहे

तुत्वे संशयोत्तरं विशेषदर्शिनी सत्ति दशायामपि तद्वत्तानिश्चयात्मकप्रत्यक्षस्योत्पत्तिः स्यादिति वाच्यं। दृष्टत्वात्। क्षणविलंबस्य शपथनि
र्णेतव्यत्वात्। न च वन्हिव्याप्यधूमवत्तानिश्चयोत्तरपर्वतधर्मिकवन्हिविधेयकत्वावच्छिन्नं प्रत्येव वन्हिव्याप्यधूमवत्सर्वत्तानिश्चयत्वेन हेतु
त्वंमुच्यतां लाघवान्न तु तादृशानुमितित्वावच्छिन्नं प्रतिहेतुत्वं गौरवात्। स्वीक्रियतां च तादृशविधेयताकत्वमनुमिताविव भ्रमसंशयोत्तरनिश्च
यात्मकप्रत्यक्षेपीति तत एव विशेषदर्शनोत्पत्तिकाले संशयोत्तरप्रत्यक्षवारणं संभवतीति वाच्यं। अनुमितावेव पक्षनिष्ठविशेष्यतानिरूपि
तसाध्यप्रकारतानतिरिक्तस्य विधेयत्वस्य सर्वानुभवसिद्धतया निरस्यतया प्रत्यक्षे तस्य शंकानास्पदत्वादिति भावः। किंच भ्रमसंशयोत्तद्ध
र्मिकतद्विपरीतज्ञानत्वेनानुगमय्य तादृशाज्ञानाव्यवहितोत्तरतद्धर्मिकतत्प्रकारकनिश्चयात्मकप्रत्यक्षत्वावच्छिन्नं प्रत्येव तद्धर्मिकतद्व्याप्यदर्शनस्य
हेतुत्वं वाच्यं। अन्यथा व्यभिचारात्। न चेदं युक्तं अव्यवहितोत्तरत्वस्य स्वत्वादिगर्भत्वेनाननुगतत्वात्। विशिष्टबुद्धिसामान्यं प्रत्येव विपरी

त्तनिर्णयस्य प्रतिबंधकतया बाधभ्रमसत्वे तद्धत्ताप्रत्यक्षस्य विशेषदर्शनसहस्रेणाप्यसंभवात्। निश्चयत्वस्यार्थसमाजग्रस्तत्वेन कार्यता
वच्छेदकत्वासंभवाच्च। न च तद्धर्मिकतद्धत्तावधारणात्मकप्रत्यक्षं प्रत्येव तद्धर्मिकतद्व्याप्यदर्शनहेतुत्वं नियमविषयकत्वस्यावधारणत्वस्य
सर्वत्र संशयोत्तरप्रत्यक्षेऽसंभवात्तस्याप्यर्थसमाजग्रस्ततया कार्यतानवच्छेदकत्वाच्च। विषयिताविशेषस्यावधारणत्वस्य च मानाभावे
न निरस्तत्वादित्याशयेन हेतुतामतदित्युक्त्वा स्वरसो व्यंजितः। तथाविधनिश्चयत्वेनेति पक्षधर्मिकव्याप्यवत्तानिश्चयत्वमात्रेणेत्यर्थः। न च तत्तदप्रा
ण्यज्ञानानास्कंदितत्वस्यापि कारणतावच्छेदके निवेशे तन्मात्राभिधानमयुक्तं। परामर्शधर्मिकतत्तदप्रामाण्यज्ञानाभावस्य स्वातंत्र्येणैवानुमि
तिहेतुत्वात्। अन्यथा विशेष्यविशेषणभावभेदेन विनिगमनाविरहेण गुरुतरानंतकार्यकारणभावप्रसंगात्। गृह्यमाणप्रामाण्यस्यैक
स्य परामर्शोत्तरं अन्यपरामर्शानुत्क्षणविलंबेनैवानुमितेः स्वीकारात्। तदुत्तरपरामर्शाभावविशिष्टतत्तदप्रामाण्यज्ञानत्वावच्छिन्न।

राम
२८

भावत्वेनैव वाहेतुत्वस्य वक्तुमशक्यत्वादिति भावः। केचित्तु भ्रमेत्यादि तथाविधनिश्चयत्वेनेत्यंतं एक एवं ग्रंथः। तेन विशेषदर्शनस्य विशेषणज्ञा
नविधया कुत्रचिज्जनकत्वेपि हेतुत्वमतद्ग्रंथस्य नासंगतिरित्याहुः। ननु निश्चयहेतेनहेतुत्वविवक्षणे व्याप्तिमत्तादवस्थ्यं। तद्धि विशेषदर्शन
स्यापि तद्व्याप्यवत्तानिश्चयत्वादतस्माह। विशेषदर्शनस्य चेति। तथा च विशेषदर्शनस्य भ्रमादिविरोधित्वेन कारणत्वं अनुमितौ तु व्याप्य
वत्तानिश्चयत्वेनातो वैलक्षण्यमिति भावः। भ्रमादीति। अन्यथा तमसि घटसंशयोत्तरं विनापि व्याप्यदर्शनमालोकसंयोगमात्रात् घटनि॰
श्चयोनस्यादिति भावः। तत्त्वं हेतुत्वं। व्यावर्तकधर्मदर्शनव्यंजकधर्मदर्शनालोकसंयोगादिदर्शनसाधारणभ्रमादिविरोधित्वमस्येकं दुर्वच
मित्यावेदयितुमुक्तमुक्तत्वादिति वस्तुतस्तदपि वचनमात्रं। ननु दोषस्थलीयपीतत्वाभावव्याप्यदर्शनस्यावृत्तसंभवतीति भावः। यद्यपि
वह्निव्याप्यवत्तानिश्चयत्वघटकदलद्वयस्य विशेष्यविशेषणविशेष्यभावेन गुरुतरकार्यकारणभावं कल्पनामपेक्ष्यतद्दोषे स्वच्छेत्त्वीये

दूय

त्पक्षकतत्साध्यकानुमितिंप्रतितद्विशेष्यकतद्व्याप्याभावप्रकारकज्ञानत्वेनप्रतिबंधकतायाएवलाघवेनकल्पनात्। व्याप्यसंशयतोऽनु
मित्यनुत्पत्तिसंभवात्। व्याप्यवत्तानिश्चयत्वंनानुमितिहेतुत्वं। किंतुव्याप्यप्रकारकज्ञानत्वमात्रेणतत्रचभ्रमत्वज्ञानानास्कंदितत्वमेवा
पेक्षितंनतुतन्निश्चयानास्कंदितत्वं। संशयसाधारणस्यव्याप्यवत्ताज्ञानस्यक्वचिदप्यनुमित्यनुपधायकत्वात्। व्याप्याभावप्रकारकज्ञा
नत्वेनप्रतिबंधकतायामपिनभ्रमत्वनिश्चयानास्कंदितत्वस्यभ्रमत्वज्ञानानास्कंदितत्वस्यवाप्रवेशः भ्रमत्वनिश्चयास्कंदिताद्व्याप्या॰
भावसंशयादप्यनुमित्यापत्तेः। यत्रव्याप्याभावस्यभ्रमात्संशयाद्वानंतरंव्याप्यपरामर्शस्तत्रभ्रमादेर्नाशोत्तरमेवानुमितिः। गुरुतरव्याप्यनि
श्चयत्वेनहेतुत्वमपेक्ष्यक्षणविलंबकल्पनायान्याय्यत्वात्। तथापिव्याप्यतदभावसमुच्चयात्मकपरामर्शादप्यनुमित्युपपत्तयेव्याप्याभा
वप्रकारत्वानवच्छिन्नव्याप्यप्रकारतावच्छिन्नविशेष्यताकज्ञानत्वरूपव्याप्यनिश्चयत्वंगुरुतरमपिहेतुतावच्छेदकमितिप्रांचः। नव्यास्तुव्या

प्यप्रकारत्वान्यप्रकारत्वानवच्छिन्नपक्षनिष्ठविशेष्यताकज्ञानत्वमेवपक्षधर्मिकव्याप्यवत्तानिश्चयत्वंवाच्यं।अतस्ताद्रूप्येणानुमितिहे
तुतायांनविनिगमनाविरहावकाशः।पक्षःसाध्यव्याप्यवान्नवेतिसंशयस्यव्याप्यप्रकारतानिरूपितयत्पक्षनिष्ठविशेष्यत्वतदेकव्या
प्यप्रकारताभिन्नेनव्याप्याभावप्रकारत्वेनावच्छिन्नमतस्तादृशसंशयादप्यनुमित्यनुत्पादः।संशयमीत्रस्यैवप्रकारताद्वयनिरूपितै
कविशेष्यतावत्वात्।अतएवलीलावतिप्रकाशेविरोधिननारूपावच्छिन्नविषयताप्रतियोगिज्ञानंसंशयः।समूहालंबनेविरोधिप्रत्ये
कप्रकारत्वावच्छिन्नभिन्नैवविशेष्यतानतुविरोधिनारूपनिरूपितैकेतिसंशयग्रंथेस्फुटमभिहितमितिप्राहुः।अतएवेति।तादृशनि
श्चयत्वस्यलक्षणघटकत्वादेवेत्यर्थः।लिंगवत्वेति।लिंगव्याप्यं।आदिपदेनपक्षपरिग्रहः।लक्षणपदंस्वरूपपरं।तथाचव्याप्यत्वरू
पोयोतिदेशवाक्यार्थस्तस्ययत्ज्ञानंवन्हिव्याप्यधूमवत्पर्वतसदृशंमहानसपदवाच्यमित्याकारकंतज्जन्यायांमिदंमहानसपदवाच्यमि

त्या कारकोपमितावित्यर्थः। तथाविधेति। तादृशो योऽतिदेशवाक्यार्थः सादृश्यं तत्प्रतिसंधानत्वेनेत्यर्थः। ननु वाक्यार्थस्यापि प्रवेशो माना
भावात्। गौरवाच्चेति ध्येयं। नचेति वाच्यमिति परेणान्वयः। न्यायार्थेति। चिंतामणिकृन्मते पंचावयवजन्यविशिष्टवैशिष्ट्यबुद्धिस्वीकारात्।
स्वमते तूपनयार्थविशेष्यक निगमनार्थविशेषणकबोधेति प्रसंगो द्रष्टव्यः। ननु वन्हिव्याप्यधूमवानयमित्युपनयार्थज्ञानं नपक्षे
व्याप्तिविशिष्टप्रकारकेमतुबर्थस्य वन्हिव्याप्यधूमसंबंधिन एव तादात्म्येन तत्र प्रकारत्वात्। लक्षणघटकं च तादृशज्ञानं मतोनाति
व्याप्तिः। तथा च यमित्यादि प्रयोगस्तु सर्वसंमत इत्यत आह। तच्छब्देनेति। ननु यत्र सोऽस्तीति वाक्याद्वन्हिव्याप्यधूमवत्पर्वतोऽस्ती
ति धीस्तत्रैककारस्थ्यल एव व्याप्त्यादिघटकीभूतं प्रत्येकपदार्थतच्छब्दशक्तिज्ञानात्प्रत्येकपदार्थोपस्थित्या परस्परमन्वयात्। त
द्व्याप्यपर्वतस्योपस्थितिरतो नातिव्याप्तिरेवं यदि ब्रूयात्तदाप्याह। सांकेतिकेति। यत्र वन्हिव्याप्यधूमवत्पर्वत एवडित्यादिपदसंके

तत्राह। प्रथमं ज्ञानस्त्वं इति स्तो स्तोत्यादिवाक्यजन्ये वन्हिव्याप्यधूमवत्सर्वत। स्तोत्याकारकशाब्दबोधे ऽतिव्याप्तिरित्यर्थः। शब्दांतरे तु नि
रूढव्युत्पत्तेरसत्वादिति भावः। ननूपनयोर्थज्ञानं नन्यायार्थज्ञाने हेतुः तद्घटकप्रसेकपदजन्यपदार्थीयस्मृतेर्महावाक्यार्थधीप
र्यंतमसत्वेनावांतरवाक्यार्थज्ञानस्य महावाक्यार्थबुद्धावहेतुत्वात्तत्कथं तत्रातिव्याप्तिरत आह व्युत्पादयिष्यत इति पदजन्यपदार्थ
स्मृतिमात्रं नान्वयबोधे हेतुः किंतु पदप्रयोज्यं पदार्थधीमात्रं तच्चावांतरवाक्यार्थमदायैवतावत्सर्वत्रमस्तीति भावः। ननु तच्छब्दबु
द्धिस्थत्वेनैव पदार्थोपस्थितिरतः सो स्तोत्यादिवाक्यजन्यबोधे कथमतिव्याप्तिरुक्तेत्यत आह। तदादेश्चेति। व्युत्पादयिष्यत इति। पू
र्वेणान्वयः। व्याप्यवत्वादेः संस्कार इव स्मरणेपि उपेक्षान्यतद्वत्तानिश्चयत्वेन हेतुत्वस्य प्रामाणिकत्वे तत्रातिव्याप्तिवारणाय तथा
विधनिश्चयत्वमात्रावच्छिन्नहेतुत्वलक्षणे प्रवेश्यमित्याशयेनाह। तत्रातिरिक्तस्येति। पदजन्यत्वस्येति। कारणत्वादिसंबंधेन घटा

दियपदादुपस्थितस्याप्याकाशादेः शाब्दबोधानुत्पत्त्यावृत्त्यापदजन्यपदार्थोपस्थितित्वेनैव तच्छाब्दबोधं प्रतिहेतुत्वादित्यर्थः॥ ननु
चरमज्ञानपदस्यानुभवपरत्वेनैव स्मृतेर्वारणसंभवात्। तथाविधनिश्चयत्वमात्रेण हेतुत्वं लक्षणे न निवेश्यं किंतु तादृशनिश्च
यत्वेन हेतुत्वमेवान्यथानुमितावपि भ्रमत्वज्ञानानास्कंदितव्याप्यवत्तानिश्चयत्वेनैव हेतुत्वादसंभवापत्तेः॥ तत्कुतः शाब्दधीवा
रणामत आह। निश्चयत्वेनेति। ननु तच्छाब्दबोधे तदर्थकपदज्ञानत्वेनैव हेतुत्वे तत्र च वृत्त्या स्वजन्यपदार्थोपस्थितेः कारणताघटकतया
सत्तित्वादेवोक्तातिप्रसंगनिरासंभवे पदार्थोपस्थितिहेतुतायां न पदजन्यत्वप्रवेशो मानाभावादित्यतिव्याप्तितादवस्थ्यमत आह।
निश्चयत्वे स्येत्यपि काश्चित्। स्मृतिशाब्दरूपाया एव पदार्थोपस्थितेर्व्यापारत्वात्तस्याश्च निश्चयत्वनियमाच्छाब्दबोधे पदार्थस्मृ
तित्वेन वृत्तिज्ञानजन्यपदार्थोपस्थितित्वेनैव वा हेतुत्वं न तु निश्चयत्वेनेति नातिव्याप्तिरिति भावः॥ न चेति वाच्यमिति परेणान्वयः।

तथापि पदार्थोपस्थितिजन्यतयातिव्याप्तेर्निरासेपि। अत्र च घटवदित्यादि विशिष्टवैशिष्ट्यबुद्धौ न घटत्वादिनिश्चयत्वे
न हेतुत्वं किंतु घटत्वादिप्रकारकज्ञानत्वमात्रेणायं घटो न वेति संशयोत्तरमपि तादृशबुद्ध्युत्पादात् किंतु यत्र विशेषण
तावच्छेदकांशे धर्मितावच्छेदकतया किंचिज्ज्ञानं तत्रैव तत्प्रकारकनिश्चयत्वेन हेतुत्वं यथा नीलघटवदित्यादौ घटत्वविशि
ष्टविशेष्यकनीलनिश्चयत्वेन हेतुत्वमित्याचेदयितुं तत्रादित्यभिहितमिति ध्येयं। वस्तुतः पर्वतो वह्निमान्न वेतित्यादिसंश
यदशायां वह्निव्याप्यधूमतत्पर्वतत्वावच्छिन्नप्रकारताकस्यैव तादृशविशिष्टपर्वतत्वावच्छिन्नविशेष्यताकस्यापि ज्ञानस्या
नुत्पादात्। उभयत्रैव पर्वतविशेष्यकवह्निव्याप्यवद्धूमवत्त्वानिश्चयत्वेन हेतुत्वं अन्यथा तु वह्निव्याप्यधूमवत्पर्वतत्वावच्छिन्न
विषयताकज्ञानत्वेनैव बोध्या विशेष्यत्वप्रकारकत्वयोर्द्वयोरपि तादृशविषयतात्वात्। एवं च विशिष्टस्य वैशिष्ट्यमिति बुद्धौ एक

२

विशिष्टे परवैशिष्ट्यबुद्धौ चोभयत्रापि विशेषणतावच्छेदकप्रकारकनिर्णयत्वेन हेतुत्वं मिसावेदयितुं तत्तदित्यभिहितमिति ध्येयं।
विशेष्ये विशेषणं तत्रापि विशेषणांतरमित्यादिज्ञानस्यापि विशिष्टवैशिष्ट्यज्ञानतया तत्र विशेषणतावच्छेदकप्रकारकनिर्णयस्य
हेतुत्वासंभवात् तदित्युक्तमित्यपि कश्चित्। खलेकपोतन्यायेन शाब्दधीरिति मते तादृशप्रत्यक्षं प्रत्येव विशेषणतावच्छेदप्रकारकनि
र्णयस्य हेतुत्वं शाब्दादेस्तादृशविषयितायां पदार्थोपस्थित्यादेरेव नियामकत्वसंभवादिति मते वा न शाब्देति व्याप्तिरतः प्रत्यक्षे
चेत्युक्तं। ननु विशिष्टवैशिष्ट्यबुद्धौ विशेषणतावच्छेदकप्रकारकज्ञानत्वेनैव हेतुत्वं न तु निश्चयत्वेन गौरवात् कुतो तिव्याप्तिरत आह दं
डो रक्तो न वेति। तादृशसंशयानुव्यवसायस्य रक्तत्वेन दंडसंदेहस्याकारको रक्तत्वतदभावप्रकारको दंडविशेष्यकज्ञानवत्तावगा॰
ही न तु रक्तत्वविशिष्टदंडज्ञानावगाही। रक्तदंडसंदेहीत्यनुव्यवसायस्य रक्तदंडकोटिकस्यैतादृश धर्मिकस्यैव संशयस्य न तु दंडधर्मिक

रक्तत्वसंशयस्यतदीयत्वेवाविशेष्येविशेषणमितिन्यायेनैवनचैवंरक्तोदंडोनवेतिसंशयानंतरमयरक्तदंडवान्नवेत्यौचित्याद्वर्जितःसंशयो
नस्यादिद्रितिवाच्यं।इष्टत्वात्।सत्वेवातस्यापिविशेष्येविशेषणमितिन्यायेनैवस्वीकारात्।केचित्तुविशिष्टवैशिष्ट्यवैशिष्ट्यविषयताक
स्याभुक्तसंशयस्यानुभवसिद्धतया।विशेषणतावच्छेदकप्रकारकज्ञानत्वेनैवतादृशबोधहेतुत्वंनतुतादृशनिश्चयत्वेनगौरवात्।व्य॰
भिचाराच्च।नचसंशयनिश्चयसाधारणज्ञानस्याप्रामाण्यनिश्चयास्कंदितस्यैवकार्याजनकतयातदप्रामाण्यनिश्चयत्वावच्छिन्ना
भावत्वेनहेतुत्वकल्पनेगौरवमितिवाच्यं।सर्वत्रैवाप्रामाण्यज्ञानस्यानुगतरूपेणतद्विरोधित्वस्यदुर्वचत्वेनाप्रामाण्यनिश्चयानांत
त्तद्व्यक्तित्वावच्छिन्नाभावत्वेनहेतुतायांगौरवानवकाशात्।।विशेषणतावच्छेदकप्रकारकनिश्चयत्वेनहेतुतापक्षएवतदप्रामाण्य॰
ज्ञानमात्रस्यकार्यविरोधितयातदप्रामाण्यनिश्चयव्यक्तीनामिवतदप्रामाण्यसंशयव्यक्तीनामप्यभावस्यतत्तद्व्यक्तित्वेनैवविशिष्टवै

शिष्टधीहेतुत्वाकल्पनायां विपरीतगौरवापत्तेरित्याहुः। विशिष्टेति। घटत्वादिविशिष्टो यो विषयस्तद्विषयकत्वेनेत्यर्थः। तथाच विन
श्यदवस्थज्ञानेनजनितयोर्घटमिच्छाद्वेषयोर्घटमिच्छामि घटं द्वेष्मीत्यादिविशिष्टवैशिष्ट्यप्रत्यक्षे व्यभिचारात्। नज्ञानत्वं तदीयकार
णतावच्छेदके प्रविष्टमितिभावः। तेनाविनश्यदवस्थज्ञानजनितेच्छादेरिच्छात्वाद्यंशे निर्विकल्पकप्रत्यक्षस्य तज्जनकज्ञानादिच्छा
त्वादिप्रकारेण तादृशेच्छादेर्द्वितीयसाक्षात्कारस्य च प्रागुपनीत घटादिविषयकेच्छात्वादिनिर्विकल्पकादेवसंभवात्। तादृशस्थले व्य
भिचारासंभवेपिनक्षतिः। ननुज्ञानस्येच्छाद्वेषौ प्रति कार्यसहभावेन हेतुत्वमते विनश्यदवस्थज्ञानेन तयोरजननात्कुत्र प्रत्यक्षे व्य
भिचारइत्यतः स्थलांतरमाह। कृतेश्चेति। नचकृतिसाक्षात्कारएव विषयोपनीतभानार्थं विषयस्मृतेरावश्यकत्वात्। नव्यभिचारः सप्रका
रकतद्विषयकत्वेनेच्छादिसाधारण्ये नैवतद्विषयकालौकिकप्रत्यक्षं प्रत्यक्षेपि हेतुत्वादिति भावः। ननु प्रत्यासत्तिविधाया विशिष्टविषय

राम
२३

कस्मृतेरनपेक्षयापिविशिष्टबुद्धौविशेषणज्ञानस्यहेतुत्वानुरोधेनतदपेक्षावश्यकीति कुतोव्यभिचारइत्यतआह।विशेषणविषयकादि
ति।तथाचविशिष्टबुद्धावपिविशेषणज्ञानत्वेननहेतुत्वंस्मृतौव्यभिचारात्।किंतुतद्विषयकत्वेनैवतच्चप्रत्यक्षादिसाधारणमतोनैतदनुरोधेनवि
शिष्टस्मृतेरावश्यकतेतिभावः।समानविषयकत्वेनैवसंस्कारस्मृत्योःकार्यकारणभावाद्विशेषणविषयकसंस्कारात्कुतोविशिष्टस्मृतिरि
त्याशंकामपनेतुंविशिष्टसंस्कारादित्युक्तंतत्रेति।तत्तद्विशिष्टवैशिष्ट्यबोधेइत्यर्थः।तथाचविशेषणतावच्छेदकीभूततद्धर्माभावाप्रकारक
तत्तद्धर्मप्रकारकत्वेनतत्तद्धर्मप्रकारतान्यप्रकारत्वानिरूपिततत्तद्विशेषणनिष्ठविशेष्यताकत्वेनैववातत्तद्विशिष्टवैशिष्ट्यबुद्धौहेतुत्वाल्लक्षणेचता
दृशप्रकारताकज्ञानत्वावच्छिन्नहेतुतायाएवनिवेशान्नातिव्याप्तिरितिभावः।यद्यपिविशेषणतावच्छेदकप्रकारकत्वमात्रेणविशिष्टवैशिष्ट्य
बुद्धिहेतुत्वेवह्निव्याप्यांशेऽनुद्बुद्धसंस्कारात्पर्वतेंदिबुद्धिसंयोगदशायांचवह्निव्याप्यधूमवान्पर्वतइत्याकारकविशिष्टवैशिष्ट्यप्रत्यक्षापत्तिः।सं

स्कारात्मकस्यैवसंनिकर्षस्यव्याप्यांशेसत्वाद्धूमोवन्हिव्याप्योनवेत्याकारिकायाज्ञानलक्षणप्रत्यासत्तेःसंभवाच्च। नचायंयत्तत्प्रत्यक्षव्यक्ति
विशेषान्प्रतितत्तदुद्बोधकस्यतत्तद्व्यक्तित्वेनहेतुत्वकल्पनातदभावादेवतादृशप्रत्यक्षापत्त्यसंभवात्। तत्तत्प्रत्यक्षव्यक्तीनांपूर्वस्मृतिव्य
क्तीःकल्पयित्वातत्तत्स्मृतौतत्तदुद्बोधकव्यक्तित्वेनहेतुत्वकल्पनामपेक्ष्यतत्तत्प्रत्यक्षव्यक्तिनिष्ठेवतत्तदुद्बोधकव्यक्तीनांहेतुत्वकल्पनायांला
घवादितिवाच्यं। यत्रविशिष्टवैशिष्ट्यप्रत्यक्षव्यक्तीनांपूर्वंविशेषणतावच्छेदकप्रकारिकाःस्मृतिव्यक्तयोऽनुभवसिद्धास्तत्रतत्प्रत्यक्ष
व्यक्तीनांशाब्दानुमित्यात्मकविशेषणतावच्छेदकप्रकारकज्ञानैर्जनितप्रत्यक्षव्यक्तीनांचापाद्यत्वात्। तादृशप्रत्यक्षव्यक्तिपिहेतुत्वमुद्बो
धकव्यक्तीनांक्लृप्तंयेनतदभावादेवतादृशप्रत्यक्षनिरासःसंभवति। तथापिविशेषणतावच्छेदकप्रकारकसंस्कारसत्वेयद्बुद्ध्यादिदशायांवि
शिष्टवैशिष्ट्यप्रत्यक्षंतद्बुध्याद्यभावविशिष्टतादृशसंस्कारत्वेनविशिष्टवैशिष्ट्यबोधंप्रतिप्रतिबंधकत्वकल्पनाददोषः। नचज्ञानत्वस्यकारण

तावच्छेदकत्वमप्येतस्योक्तप्रतिबंधकत्वकल्पनेगौरवम्।ज्ञानोपरमपिविशिष्टविषयोपधानेनकृत्यादिसाक्षात्कारापत्त्याव्यभिचारेणज्ञानत्वस्या
प्रवेशानियमेनतादृशप्रतिबध्यप्रतिबंधकभावकल्पनागौरवस्यप्रामाणिकत्वादित्याशयः।नन्वनुमितावपिव्याप्यप्रकारकत्वद्भावाप्र
कारकत्वमात्रेणहेतुत्वंनतुज्ञानत्वांतर्भावेनेत्यसंभवएवेत्यतआह।इच्छादित्वइति।ननुसाध्यव्याप्यत्वावगाहीच्छाद्वेषयोर्द्वितीयक्षणेप्रा
यशोनुमितिस्त्वयापिवाच्येच्छादिजनकस्यपरामर्शात्मकज्ञानस्यपूर्वंसत्वात्तत्युत्तरंचद्वितीयक्षणेऽनुमित्यनुत्पादोनिर्णेतुमशक्यइतिः
स्फुटव्यभिचारस्थलमाह।संस्काराच्चेति।संस्कारादीत्यादिपदादिच्छाद्वेषकृतीनांपरिग्रहः।ज्ञानत्वेनैवेति।तदंतर्भावेनैवेत्यर्थः।तत्रा
नुमितौ।नचपरामर्शानुव्यवसायेतिव्याप्तिरितितथाविधनिश्चयत्वेनहेतुत्वस्यविवक्षितत्वादितिप्राक्तनोहेतुरनुषंजनीयः।सामान्य
तोहीत्येववाऽन्येषामदृस्तेननन्वेत्यहेतुत्वलाभेपि।विषयत्वेनेति।साक्षात्करोमीतिप्रतीतिसाक्षिकविलक्षणविषयत्वेनेत्यर्थः।तेवातींद

द्रियगुरुत्वादृष्टादेः सत्यपींद्रियसंनिकर्षेन प्रत्यक्षं न तु निर्विकल्पकविषयत्वेनेत्यर्थः। ज्ञानादेः सविकल्पकमात्रवेद्यतया तदीयप्रत्यक्षे व्य
भिचारापत्तेः। अत्र कारणस्य तादात्म्यं कार्यस्य तु लौकिकविषयत्वं प्रत्यासत्तिस्तेनातीतविषयकप्रत्यक्षे ऽतीतविषयानाम हेतुत्वेपि न क्षतिः।
ननु लौकिकविषयत्वस्यैकस्याभावात् कार्यतावच्छेदकसंबंधाननुगता अपि कार्यकारणभावः षोढा संनिकर्षजन्यतायाः संनिकर्षभेदे
न नानात्वात्। न च साक्षात्कारत्वनिरूपितविषयत्वमेव कार्यतावच्छेदकसंबंधः। तादृशविषयतन च प्रत्यक्षं नातीतादावतो न व्यभिचार इ
ति वाच्यं। शुक्तिमृगतृष्णादिधर्मिकस्य तु रजतमेवेदं तत्तु जलमेवेदमित्यादि प्रत्यक्षस्य दोषविशेषजन्यस्य तादृशविषयतासंबंधेनातीतर
जतजलादावपि सत्वेन व्यभिचारात्। तत्रापि तद्रजतं साक्षात्करोमीत्याद्यनुभवात्। न च तादृशविषयतांशे भ्रमः मानाभावात्। साक्षात्का
रत्वनिरूपितविषयताया लौकिकसन्निकर्षस्येव दोषविशेषस्यापि जन्यतावच्छेदकत्वप्रसक्तावेकदोषस्यैकत्वानुगमशक्यत्वात्। लौकिकस्यै

वदोषविशेषजन्यस्यापि रतप्रकारकप्रत्यक्षस्य रजतानयनगोचरप्रवृत्तिहेतुतयोपादानप्रत्यक्षनिष्ठप्रवृत्तिजनकतावच्छेदकत्वेन तादृश
विषयताया लौकिकासंनिकर्षजन्यदोषविशेषजन्यप्रत्यक्षविशेषसाधारणत्वाच्च। वस्तुतो विषयत्वस्य ज्ञानसमानकालीनतया निरु
पकविषयतावच्छिन्नस्य घटादेः प्रत्यक्षप्राक्काले ऽसत्वात् तादृशविषयत्वेन हेतुत्वं व्यभिचार्येवेत्यत आह। तद्विषयकेति। अत्र
तत्सदं विषये प्रत्यक्षे चोभयत्रान्वितं तथा च तत्तद्विषयकत्वविशिष्टतत्प्रत्यक्षव्यक्तित्वेन कार्यत्वं तत्तद्विषयकव्यक्तित्वेन हेतुत्वं
तत्र च कार्यस्य विषयतामात्रं कारणस्य तु तादात्म्यं प्रत्यासत्तिः। न च तत्तद्विषयकत्वस्य कार्यतावच्छेदके प्रवेशो व्यर्थस्तत्प्रत्य
क्षव्यक्तेरेव विषयतासंबंधेनान्यत्रापि सत्वेन व्यभिचारवारकत्वादिति भावः। ननु तत्तत्परामर्शव्यक्तिप्रत्यक्षे तत्तत्परामर्शव्यक्तित्वेन हे
तुत्वे परामर्शप्रत्यक्षसामान्यप्रत्यक्षं प्रत्यपि परामर्शत्वेन हेतुत्वमावश्यकं। यद्विशेषयोरित्यादिव्याप्तेस्तथा च तदनुव्यवसाये ऽतिव्या

दि

मेप्तरेवेत्यतआह। कदाचिदिति। प्रमाणाभावात्तादृशी व्याप्तिरेव नास्तीसतीवातत्परामर्शत्वव्यापकीभूतज्ञानत्वादि धर्मावच्छिन्नका
रणत्वमादायैवचरितार्थमपरामर्शत्वेनहेतुतां व्यवस्थापयतीतिभावः। यद्यपि विषयस्य प्रत्यक्षं प्रतिहेतुत्वेमानाभावः। नचघटा
दिविषयस्यनाशदशायामपितैन्द्रियसंनिकर्षसत्वादुत्तरकालं तत्प्रत्यक्षापत्तिरितिवाच्यं। यदायत्रयत्कार्यस्योत्पत्तिस्तदव्यवहितप्रा
क्क्षणेतत्रतत्कारणमितिव्याप्तेः कारणतासंपादकतयाविषयनाशकालावच्छेदेनविषयेसंनिकर्षात्मककारणविरहादेवतदसं
भवात्। नचयदायद्वृत्तिकार्यस्योत्पादः तदव्यवहितपूर्वतद्वृत्तिकार्यस्य कारणमित्येवव्याप्तिः कारणताग्राहिकेतिविनष्टविषयस्थले
प्रत्यक्षवारणार्थंविषयस्यहेतुत्वमावश्यकमितिवाच्यं। कार्यकारणभावांतरकल्पनागौरवेण घटीयरूपे चक्षुःसंयुक्तसमवायसत्वेवि

घमानस्यासन्निकृष्टरूपांतरप्रत्यक्षप्रसंगेनचतादृशव्याप्तेः प्रतिहतत्वात्। नचशाब्दप्रत्यक्षंप्रत्यवश्यंकर्णानवच्छिन्नस्यापितस्यप्रत्यक्षा

पत्तेः। स्वावच्छिन्नत्वप्रत्यासत्त्या कर्णस्य तत्र हेतुत्वे कर्णावच्छिन्नसंयोगादेरपि श्रावणप्रत्यक्षप्रसंगादिति वाच्यं। तावतापि ज्ञानादिसाक्षा
त्कारे विषयस्य हेतुत्वाप्राप्तेः। तथापि सत्यपींद्रियसंनिकर्षादौ सामान्यकारणे गुरुत्वाद्यतींद्रियपदार्थनामप्रत्यक्षतया ऽवश्यं विषया
णां विशेषतो हेतुत्वं वाच्यं। ताद्धिरहादेव गुरुत्वादेरप्रत्यक्षत्वात्। केचित्तु तेषामतींद्रियत्वानुरोधात् साक्षात्कारत्वनिरूपितविषयत्वेन त
दृशाविषयतावदवृत्तिधर्मशून्यत्वेन वा प्रत्यक्षसामान्यं प्रति हेतुत्वं तत्र चैलौकिके सन्निकर्षजन्यतावच्छेदकतया सिद्धस्य लौकिकाख्य
विषयताविशेषस्य कार्यतावच्छेदकसंबंधत्वान्न। व्यभिचारः। धर्मविधयैव संबंधविधयापि कार्यतावच्छेदकसिद्धौ बाधकाभावात्। नव्यमते का
रणतायामतिरिक्तपदार्थत्वेन तदवच्छेदकोपलक्षितस्यैव पूर्वसत्त्वापक्षणादिति वदंति तत्रेदं कार्यताद्यवच्छेदकत्वेन विषयत्वसिद्धावप
सिद्धांतात्। अन्यथा विशिष्टबुध्यादौ विशेषणज्ञानादिजन्यत्वं विशिष्टबुद्धित्वादिनावन्त्यनुमितिं प्रति च वन्ह्यादिव्याप्यतानिश्चय

त्वेन हेतुत्वं न स्यात्। लाघवेन विषयताविशेषस्यैव तादृशजन्यतावच्छेदकत्वौचित्यात्। तत्तद्दितरत्वादिरिति। व्याप्यप्रकारकत्व व्याप्या
भावप्रकारकतरत्वादिरित्यर्थः। परामर्शत्वस्य विशेषणचतुष्टयघटितत्वात्तत्साम्यप्रदर्शनार्थं चैत्रावलोकितत्वादिविशेषणचतुष्टय
मुक्तम्। घटत्वद्विषयकत्वेतिद्वंद्वात्परस्य त्वप्रत्ययस्य प्रत्येकं संबंधात्तादृशघटत्वेन हेतुत्वं। तद्विषयकप्रत्यक्षत्वेन च कार्यत्वमित्य
र्थः। इष्टापत्तौ बाधकमाह। मानाभावादिति। ननु एतादृशकार्यान्यथानुपपत्तिरेव मानं भविष्यतीत्यत आह। अन्यथेति। चैत्रावलो
कनादिसामग्र्या द्रव्यप्रत्यक्षसामग्र्या च तादृशप्रत्यक्षस्योत्पत्तेरित्यर्थः। तथा चार्थसमाजग्रस्तत्वान्नोक्तरूपं कार्यतावच्छेदकमिति।
भावः। विशिष्टस्मरण इति। वन्हिव्याप्यधूमसर्वतस्मरण इत्यर्थः। संशयोत्तरं तदाकारस्मृत्यापत्तिभयेन स्मृतिजनकतायामपि
निश्चयत्वप्रवेशादित्याशयः। यद्यपि व्याप्यत्वादिसंस्कारं प्रति व्याप्यत्वादिनिश्चयत्वेन हेतुत्वात्तादृशसंस्कारानुत्पत्तेरेव व्या

प्यवत्वादिसंज्ञयान्तज्ञोचरस्मृतेस्संभवइत्यनुभवस्यापिनिश्चयत्वेनस्मृतिहेतुतायांमानाभावान्नविशिष्टस्मृतावतिव्याप्तिसंभावः
वना। तथापिफलव्यापारोप्रति एकरूपेणैवकारणत्वमितिप्राचीनमतेनेदंव्यापारीभूतसंस्कारंप्रत्यनुभवस्यनिश्चयत्वेनहेतुत्वेफ
ली भूतस्मृतिप्रत्यपिताद्रूप्येणहेतुत्वंमानस्यकंइदंनुचिंत्यते। धूमवत्पर्वतत्वादिरूपेणवाप्यवृक्षादिगोचरादपिवन्हिपरामर्शात्पर्वतो
वन्हिमानित्यनुमित्युत्पादादनुमितिंप्रतिवन्हिव्याप्तिधूमत्वपर्वतत्वादिनिरूपितेनविशिष्टवैशिष्ट्यावगाहिताविशेषणैवहेतुत्वंन
तुधूमपर्वतत्वाद्यंतर्भावेणव्यभिचारात्। स्मरणेतुधूमादिकमंतर्भाव्यतथात्वं। अन्यथाधूमत्वेनवाप्यगोचरादप्यनुभवात्ताद्रूप्ये
णधूमस्मरणेस्मृतेरगृहीतव्याहितत्वप्रसंगात्। अनुमितिजनकतावच्छेदकरूपेणस्मृतावहेतुत्वात्कथंतत्रेतिव्याप्तिप्रसक्तिरिति। आचा
र्यमतेत्वयदोषः। तन्मतेकारणीभूतज्ञानेधूमत्वादिनायादृशवस्तुनोभानंफलेपितथोत्तिनव्याः। यत्तुज्ञानपदस्यकरणव्युत्पत्त्याभिप्रा

॥ज्ञा॰अं॰स॰॥
३८
38

येणज्ञाकतो अथेति। विशिष्टस्यस्मरणं यस्मादितिव्युत्पत्त्या संस्कारेतिव्याप्तिरिति। तत्रसंस्कारानुत्पत्त्येत्याद्यग्रिमविरोधापत्तेः। के

चित्तयादृशास्मृतो वान्हिव्याप्यवत्वनिश्चयत्वेनानुगतरूपेणउद्बोधकविधयाहेतुत्वतादृशास्मृतावित्यर्थः प्राहुः। तच्चिंत्यं। उपेक्षान्यत्वे

नत्यादिग्रंथस्यव्याप्यविषयत्वेत्यादिग्रंथस्यचविरोधापत्तेः। तत्रहेतुत्वमिति। स्मृतौहेतुत्वमित्यर्थः। तथाचव्याप्यवत्तानिश्चयमा

त्रावच्छिन्नहेतुत्वस्यलक्षणेप्रवेशान्नविशिष्टस्मरणेतिव्याप्तिरिति भावः। उपेक्षात्वयं घकं सुवचंस्यात्तदातद्दत्यत्वंस्मृतिज

नकतावच्छेदकंयद्येवंस्यैकं भवेत्तदेवनसंभवतीत्याशयेनाह। उपेक्षात्वंहीति। संकरेति। चाक्षुषत्वंविहायउपेक्षात्वंतृणस्याज्ञा

नादौउपेक्षात्वंचविहायचाक्षुषत्वंकामिनीदर्शनादौवर्तमानंएकत्रतृणचाक्षुषेसंकीर्णमित्यर्थः। चाक्षुषत्वव्याप्यंतानैवो

पेक्षात्वंनिरुच्यतत्तद्भेदकूटमेवविशिष्टस्मृतिजनकतावच्छेदकंयदिब्रूयात्तदाह। आंशिकेति। एकस्मिन्नेवज्ञानेकिंचिदंशोउ

राम
३८

पेक्षात्वस्य क्वचिदंशे च तदभावस्यानुभवादित्यर्थः। न च व्यक्तेरभेदस्तुल्यत्वमित्यादावनुक्तत्वादांशिकत्वं नजातिबाधकमिति

वाच्यं। रूपहानावसंबंधे वा तदंतर्भावादित्यर्थः। आंशिकत्वस्योपगमात्। अव्याप्यवृत्तित्वोपगमात्। तथा च न हि जाति॰

र्व्याप्यवृत्तिरितिभाव इति केचित्। नापि प्रवृत्तेरित्यादि तथा च तद्गोचरप्रवृत्त्यजनकत्वे सति तद्गोचरनिवृत्त्यजनकं यत्तदन्यज्ञानत्वेन तद्गोच

रस्मृतौ हेतुत्वं तद्गोचरप्रवृत्तिनिवृत्त्युभयजनकत्वं ततत्प्रत्येक्षैकजनकत्वेन वा तद्गोचरस्मृतिहेतुत्वे व्यभिचाराद्भावद्वयगर्भतेति ध्येयं। अ॰

जिज्ञासितेति। तथा च तत्प्रकारकस्मृतौ तद्धर्मव्याप्यतद्धर्मप्रकारकजिज्ञासायाः अजनकं यद्यत्तदन्यज्ञानत्वेन हेतुत्वं व्याप्यधर्माणामननु

गमात् तद्धर्मव्याप्यप्रकारकजिज्ञासाजनकज्ञानत्वमप्यननुगतमतस्तद्रूपेण स्मृतिहेतुत्वासंभवात् अत्रापि निषेधद्वयगर्भतावश्य

कीति भावः। तादृशादपीति। प्रवृत्त्याद्यजनकादपीत्यर्थः। नापि संस्कारेति। तथा च पर्वतत्वधर्मिव्याप्यवत्तास्मरणं प्रति तदाकारसंस्कारजनक

ज्ञानत्वेनैव हेतुत्वात्तद्व्याप्यवत्तानिश्चयत्वावच्छिन्नहेतुताघटितलक्षणस्य तत्रातिव्याप्तिरिति भावः। तज्जनकतावच्छेदकरूपांतरेति निश्चय
त्वभिन्नस्य संस्कारजनकतावच्छेदकरूपस्यापरिचयादित्यर्थः। तथा च निश्चयत्वमात्रस्य तथात्वे स्मृतावपि तादृग्रूपेणैव हेतुतां फलव्यापा
रौ प्रत्येकरूपेण कारणस्य हेतुत्वनियमादित्युक्तातिव्याप्तिस्तदवस्थेति भावः। ननु तद्धर्मिकतत्प्रकारकस्मृताविवतादृशसंस्कारेप्यनुभव
स्य तदाकारसंस्कारजनकज्ञानत्वेनैकरूप्येण हेतुत्वं वाच्यंमतो नातिव्याप्तिरत आह। अन्योन्येति। अत्रावच्छेद्यमवच्छेदको भूतं च संस्कार
जनकत्वं विभिन्नव्याप्तिघटितमतोन्योन्याश्रयत्वं। इतरथा पुनरात्माश्रयो द्रष्टव्यः। रूपांतरापरिचयादिति। स्मृतिजनकतावच्छेदकरू
पभिन्नस्यापरिचयादित्यर्थः। ननु संस्कारे स्मृतिजनकज्ञानत्वेन हेतुत्वमतस्त्वाह। अन्योन्येति। तथा च स्मृतिजनकताग्रहे सति संस्कारजन
कत्वरूपापेक्षान्यत्र ज्ञानं तज्ज्ञाने सति स्मृतिजनकताज्ञानमित्यन्योन्याश्रय इत्यपि कश्चित्। ननु तद्धर्मिकतत्प्रकारिकायां वं सो ज्ञानव्यक्तय

स्तादृशसंस्कारानुत्पादिकालत्तङ्केद कूटवत्वमेवउपेक्षान्यत्वंनिरुच्यतद्धिशिष्टतद्धर्मिकतत्प्रकारकनिश्चयत्वेनतादृशस्मृतातथाविधसं
स्कारेचहेतुत्वंवाच्यंमतोनातिव्याप्तिर्नवान्योन्याश्रयादिरतआह।संस्कारेति।उपेक्षात्मकज्ञानादित्यादिः।तदप्रवेशादिति।उपेक्षान्यत्वाप्र
वेशोदित्यर्थः।ननुचस्मृताविवसंस्कारेपिसमानकारनिश्चयत्वेनैवहेतुत्वादुपेक्षात्मकनिश्चयान्नुसंस्कारानुत्पत्तिरेवदुर्धरेतिवाच्यं।समाना
कारोपेक्षाव्यक्तौ।नांतन्नद्व्यक्तित्वेनसमानाकारसंस्कारंप्रतिप्रतिबंधकत्वोपगमात्।उपेक्षाज्ञानोत्तरंतन्नाशोसत्येवज्ञानांतरेणसंस्कारोत्प
दादितिभावः।पेक्षान्यनिश्चयत्वेनहेतुत्वयोपेक्षात्मकज्ञानात्संस्कारानुत्पत्त्या स्मृतेरसंभवोऽतःस्मृतिजनकतायामुपेक्षान्यत्वाप्रवेशादिति
व्याप्तिरित्याहुः।तच्चिंत्यं फलव्यापकीप्रत्येकरूपेणकारणत्वमितिव्याप्तेर्भवद्भिरेवस्वीकृतत्वादन्यथास्मृतिंप्रतिज्ञानत्वेनैवहेतुत्वंनतुनिश्चय
त्वेननतुतःविशिष्टस्मरणेऽव्याप्तिरितिनव्याप्तिचाक्षुषचक्षुःसंयोगौप्रतिचक्षुष्ट्वद्रव्यत्वाभ्याविभिन्नरूपाभ्यांचक्षुषोहेतुत्वयाफलव्याप्या।

रौप्रत्येकरूपेण कारणहेतुत्वनियमेव्यभिचारात्। समानाकारज्ञानत्वेनैव स्मृतिजनकत्वं संस्कारं प्रत्येव निश्चयत्वेन हेतुतायां संशयात्संस्का
रानुत्पत्त्यैवास्मरणसंभवात्। न च विनिगमनाविरहः समानाकारज्ञानत्वेन संस्कारहेतुत्वे संशयजन्यानामनंतपंउसंस्काराणां तन्नाशकत्वे
न कारणांतराणां च कल्पनापत्तेरेव विनिगमकत्वात्। तथा च स्मृतौ नाति व्याप्तिशंकापि। नं चात्यंतताजनकसंदेहव्यावृत्तेन निश्चयत्वेन हेतुत्व
संभवे तत्साधारणेन समानाकारज्ञानत्वेन स्मृतिहेतुत्वं मन्याय्यं। तथा सत्युपेक्षाज्ञानस्यात्यंतताजनकतया तद्व्यावर्तकेनोपेक्षान्यत्वेनापि स्मृति
जनकतावच्छेदकत्वस्यावश्यकत्वापातात्। वस्तुतः समानप्रकारकज्ञानत्वेनापि न स्मृतिहेतुता किंतु स्मृतिसामान्ये ज्ञानत्वमात्रेण तद्धर्मिक
तत्प्रकारकस्मृतिं प्रति तादृशासंस्कारत्वेन हेतुत्वस्यावश्यकतया तत एवातिप्रसंगभंगादिति प्राहुः। यत्तु संस्कारं प्रत्यपि समानाकारज्ञानत्वे
नैव हेतुत्वं न तु तादृशनिश्चयत्वेन गौरवात्। संशयेन संस्कारोत्पादेपिउद्बोधकसमवधानविरहादेव न ततः स्मृत्यनुत्पादसंभवादिति। तन्न। संशय

जन्यपटसंस्कारव्यक्तीनां नाशार्थहेतुत्वांतरकल्पनागौरवप्रसंगात्। यस्य पुंसः पटसंस्कारसत्वेपि तत्सदृशवस्तुविशेषदर्शनादेव पटस्मृतिः। त
त्पुरुषीयपटस्मृतौ सामान्यं प्रत्ययितत्पुरुषीयतादृशवस्तुदर्शनत्वेनानुगतैकरूपेणैवोद्बोधकस्य हेतुतया संशयजन्यसंस्कारसत्वे तादृशव
स्तुदर्शनदशायां तत्पुरुषीयस्मृत्यापत्तेर्ब्रह्मणापि वारयितुमशक्यत्वाच्चेति दिक्। अन्ये तु निश्चयत्वघटकदलद्वयस्य विशेषणविशेष्यभा
वेन गुरुतरकार्यकारणभावद्वयकल्पनामपेक्ष्य लाघवेन तद्विशेष्यकतत्प्रकारकसंस्कारं प्रति तद्विशेष्यकतदभावप्रकारकज्ञानत्वेन प्रति
बंधकत्वं तद्विशेष्यकतत्प्रकारकज्ञानत्वमात्रेण हेतुत्वमित्युभयकल्पनमेवोचितं संशयोत्तरवर्त्तिनिश्चयादपि संशयनाशानंतरं
मवसंस्कारोत्पादसंभवादिति प्राहुः। तन्मंदं। तत्प्रकारत्वान्यप्रकारत्वानिरूपिततन्निष्ठविशेष्यताकज्ञानत्वपर्यवसितेन निश्चय
त्वेन हेतुतायां निश्चयत्वघटकदलद्वयस्यैवासंभवात्। एतेन व्याप्यसंशयोत्तरं व्याप्यत्वेवेस्य संशयाकारस्मृत्युत्पत्तिभयेन

व्याप्यवत्तायाः स्मृतौ तन्निश्चयत्वेन हेतुत्वं किंतु व्याप्यवत्ताज्ञानत्वमात्रेण व्याप्याभावप्रकारकस्मृतिं प्रति व्याप्याप्रकारक॰
व्याप्याभावप्रकारकज्ञानत्वेन हेतुत्वादेव व्याप्याभावप्रकारकत्वघटितस्य व्याप्यसंशयत्वस्य स्मृतावसंभवात्। न च व्याप्याभाववत्ता
स्मृतिं प्रति व्याप्याभाववत्तानिश्चयत्वेनैव व्याप्याभाववत्तास्मृतिं प्रत्यपि व्याप्यवत्तानिश्चयत्वेन हेतुतायां प्रमाणप्रसरे तदप्युचितं
उभयथैव संशयाकारस्मृतेर्वारणसंभवादिति वाच्यं। व्याप्यस्मृतौ व्याप्यवत्तानिश्चयत्वेन हेतुत्वे व्याप्याभावाप्रकारकत्वस्य हे
तुतावच्छेदककोटिप्रवेशे गौरवं च व्याप्याभाववत्तास्मृतिं प्रति तु व्याप्याप्रकारकत्वघटितेन व्याप्याभाववत्तानिश्चयत्वेन हेतु
त्वे प्यवच्छेदकलाघवमित्यस्यैव विनिगमकत्वात्। तथा च व्याप्यवत्तास्मृतौ नातिप्रसंगशंकापि निश्चयत्वेन तत्राहेतुत्वादित्यपि
मंतपरास्तं। प्रागुक्तदिशा निश्चयत्वस्य दलद्वयाघटितत्वात् सर्वतो वह्निव्याप्यस्वाभाववान्नवेत्यादिसंशयादपि तादृशास्मृत्याप॰

पत्तिभयेन व्याप्याभाववत्तास्मृतिं प्रत्यपि व्याप्याभावाभावाप्रकारकत्व घटितेन व्याप्याभाववत्तानिश्चयत्वेन हेतुतायाश्चावश्य
कत्वेन विपरीतगौरवाच्चेति दिक्। केचित्संस्कारप्रतिनिश्चयत्वेन हेतुत्वोक्तावपि यत्रायं घट इति प्रत्यक्षानंतरं दिवसांतरे अयं
न घट इत्याकारिका धीः तत्र तादृशज्ञानद्वयेन क्रमाज्जनितस्य घटत्वतदभावगोचरसंस्कारद्वयस्य सत्वादयं घटो न वेति सं
देहात्मकस्मृत्यापत्तेः। न च विरुद्धोभयकोट्योरेकत्रोद्बोधकसमवधानविरहान्न तथास्मृत्यापत्तिरिति वाच्यं। यस्य पुंसो घटत्व
तदभावयोः संस्कारसत्वेन तदुभयसदृशवस्तुदर्शनादेव तदुभयस्मृतिः। तत्पुरुषीय घटत्वतदभावे सामान्यं प्रत्येव तत्पुरुषी स्मृति
यतादृशदर्शनस्यानुगतरूपेणोद्बोधकस्य हेतुत्वेन तत्पुरुषीयोद्बोधकसमवधानस्यापि संभवात्। तथा च तादृशसंशयाकारस्मृ
तेर्वारणार्थमिदंत्वावच्छेदेन घटत्वप्रकारकस्मृतौ तदवच्छेदेन घटत्वाभाववत्तास्मृतिसामग्र्यास्तादृशधर्मिकघटत्वाभाववत्तास्मृतौ च

ता दृशघटत्ववत्तास्मृतिसामग्र्याः प्रतिबंधकत्वस्य प्रामाणिकतया स्मृतिजनकतायामिव संस्काराजनकतायामपि निश्चयत्वं
न निवेशनीयं। अन्यथैव संशयोत्तरं तदाकारस्मृतेर्वारणादित्याहुः। तच्चिंत्यं। संशयजन्यपंडसंस्कारव्यक्तौ नानाशार्थहेतुत्वं तरकल्प
नामपेक्ष्य संस्कारजनकतायां निश्चयत्वप्रवेशस्यैव लाघवेनोचितत्वादिति संक्षेपः। तथात्वमिति। स्मृतिहेतुत्वमित्यर्थः। तथात्व
निश्चयत्वमात्रेण स्मृतिं प्रत्यहेतुत्वान्न तत्र लक्षणातिप्रसंगः। अनुभवत्वं च जातिः। न तु स्मृत्यन्यज्ञानत्वं। तेन ज्ञानत्वापेक्षया गुरुत्वत
यान तस्य कारणतावच्छेदकत्वहानिरिति भावः। द्वित्र्यनुभवस्थले स्वजन्यस्मरणेनैकसंस्कारनाशेऽपि संस्कारांतरसत्वात्तदुत्तरस्मरण
संभवत्यत उक्तं। सत्वादिति। अनुभवोत्तरमननुभूतस्येत्यर्थः। व एतत्स्थले विषयकस्मृत्युत्तरमननुभूतेत्यर्थः। तेन समानप्रकारकत्वेनै
व स्मृतेः संस्कारनाशकत्वाद्बहुशोनुभूतस्यापि एकस्मृत्या संस्कारस्य तन्नाशात् स्मरणांतरासंभवे सकृत्पर्यंतानुसरणं व्यर्थमिति परास्तं।

राम
४२

नचांततः स्वानुभवीयानुव्यवसायस्यैवस्वानुभवांतरत्वात्। सकृदनुभूतत्वंवस्तुनोऽसिद्धमितिवाच्यं। स्वतः प्रामाण्यभियाऽनुव्यवसा
यस्यव्यवसायोल्लि। खितधर्मवद्धर्मिविषयकत्वास्वीकाराद्विषयांतरसंचारादिनाऽनुव्यवसायानुत्पत्तिसंभवाच्चेतिभावः। स्मरणोत्तर॰
मिति। कालांतरइतिशेषः। तेनैकसंस्कारेणैवक्वचित्क्रमिकस्मरणद्वयोत्पादसंभवेपिनक्षतिः। प्रसंगादिति। तथाचानुभवत्वेनहेतु
त्वेव्यभिचारान्निश्चयत्वेनैवतथावाच्यमित्यत्रतिव्याप्तिस्तदवस्थैवेतिभावः। ननुस्मरणात्मकफलंनसंस्कारनाशहेतुस्तथाचघटपश्चा
श्चद्रव्यमित्याकारकसंस्कारेणोद्बोधकवशात्जनितयाघटोद्रव्यमित्याकारस्मृत्यातन्नाशेपश्चात्पटोद्रव्यमित्याकारकस्मृतेरनुत्पत्ति
प्रसंगादतआह। समानेति। तथाचघटधर्मिकद्रव्यत्वप्रकारकसंस्कारनाशत्वावच्छिन्नंप्रत्येवतादृशस्मृतित्वेनहेतुत्वात्तादृशस्मरणस्य
सत्वेपिपटधर्मिकतादृशस्मृतेरभावादेवनोक्तसंमूहालंबनस्यनाशः। नचघटधर्मिकद्रव्यत्वप्रकारकसंस्कारनाशत्वावच्छिन्नस्यसाम

श्रीसत्वादसमूहालंबनइवप्रवृत्तेपितद्वच्छिन्नस्योत्पादोदुर्वारइतिवाच्यं। घटधर्मिकद्रव्यप्रकारकसंस्कारमात्रस्यैवसामग्रीवशेनघटे
वस्त्वंतरेवापदार्थांतरावगाहित्वनियमेनपदार्थांतरगोचरतादृशस्मरणात्मकविशेषसामग्रीविरहादेवघटधर्मिकद्रव्यत्वप्रकारकसं
स्कारनाशतावच्छिन्नस्योत्पत्त्यसंभवादितिभावः। संमूहालंबनस्यापिसंस्कारस्याविरलक्रमेणप्रत्येकगोचरस्मृतिद्वयजनकत्वसं
भवात्क्रमिकेत्युक्तं। क्रमिकदिनद्वयानंतरोत्पन्नेतितदर्थः। यद्यप्येवमपिकालरोगादिनासंस्कारनाशस्थलेव्यभिचारइतिकाल
रोगाद्यजन्यसंस्कारनाशत्वेनैवस्मृतिजन्यत्वंवाच्यंतत्रचकालरोगाद्यजन्यत्वंतत्तद्भेदकूटातिरिक्तंदुर्वचंतथाचतेषांकालविशेषणवि
शेष्यभावेविनिगमकाभावादनंतकार्यकारणभावध्रौव्येतत्तत्स्मृतिव्यक्तित्वेनतत्तत्संस्कारनाशंप्रतिहेतुत्वमेवलाघवायुक्तं अतःस
हृदनुभवस्थलेपिचरमस्मृतेस्तद्व्यक्तित्वेनैवतन्नमशात्वांगीकारान्नस्मरणे तरस्मरणेप्रसंगः। तथापिरोगादिनाशव्यावृत्तस्यसंस्कार

२ तत्पुरुषीय ४
२ नहेतुत्वे

त्वव्याप्यजातिविशेषस्यैवस्मृतिनाश्यतावच्छेदकतया सिद्धत्वात्॥ न तत्तत्संस्कारनाशव्यक्तिं प्रति तत्तत्स्मृतिव्यक्तित्वेन हेतुत्वं। वस्तुतोय

त्पुरुषीयतत्प्रकारकसंस्कारो न रोगादिनाश्यस्तत्पुरुषीयतत्प्रकारकसंस्कारनाशसामान्यं प्रत्येवं न हेतुत्वे तत्प्रकारकस्मृतित्वेन बाध॥

काभाव इति तत्रैव स्मरणोत्तरमस्मरणप्रसंग इत्युक्त इत्यदोषः॥ केचित्तु रोगकालादिजन्यतत्तत्संस्कारनाशभेदकूटस्य युगपदेव विशेष

त्वं न त्वेकविशिष्टापरभेदत्वेन एकविशिष्टापरवैशिष्ट्यप्रवेशो कार्यतावच्छेदकस्य रूपत्वापातात् अतो नं तत्कार्यकारणभावशंकैवनेत्यपिव

दंति। समूहालंबनादित इति। आदिपदादेकधर्मिकनानाप्रकारकसंस्कारपरिग्रहः। अत्रेदमवधेयं। तद्विशेष्यकतत्प्रकारकसंस्कारना

शं प्रति तादृशस्मृतेः कार्यसहभावेनैव हेतुत्वं वक्तव्यमन्यथा स्मरणजन्यसंस्कारव्यक्तौ नांक्षणिकत्वापत्तेर्नाशकीभूतस्य स्वजनकस्म

रणस्यैव सत्त्वादुत्पत्त्यनंतरमेव नाशसंभवात्। न चैवमपि यत्र घटत्वप्रकारकानुभवोत्तरं युगपत्तादृशसंस्कारोनुभवांतरं च ततश्च घटत्वप्र

कारकसंस्कारांतरस्मरणे तत्र द्वितीयस्य घटत्वप्रकारकसंस्कारस्य क्षणिकत्वापत्तिर्द्वितीयसंस्कारोत्पत्तिकालीनतरक्षणेपि सत्वादिति
वाच्यं। उपेक्षान्यज्ञानस्यैव संस्कारजनकतया तत्रत्य द्वितीयानुभवस्योपेक्षात्वस्वीकारेण ततः संस्कारस्यैवानुत्पत्तेः॥ प्रतियोगितया
संस्कारनाशत्वावच्छिन्नं प्रति प्राक्क्षणवृत्तित्वविशिष्टस्वजनकतासंबंधेन स्मृतित्वेन हेतुत्वमित्यपि कश्चित्। वस्तुतः संस्कारनाशं प्रति
समानाकारस्मृतित्वेनेव ज्ञानसुखदुःखेच्छाद्वेषप्रयत्नेशब्दानामपि नाशान् प्रति सामानाधिकरण्यप्रत्यासत्त्या ज्ञानत्वसुखत्वदुःख
त्वादिप्रत्येकरूपेणैव हेतुत्वं न तु स्वोत्तरोत्पन्नविशेषगुणत्वादिना तथात्वं स्वत्वस्य तत्तद्व्यक्तिविश्रांतिकत्वेनानंतकार्यकारणभावापत्तेः
एवं च ज्ञानसुखदुःखादीनां स्वोत्तरक्षण एव विनाशवारणाय प्रतियोगितासंबंधेन ध्वंससामान्यं प्रति योग्यधिकरणतादात्म्यसंबंधे
न ध्वंसत्वेनाप्यनुगतैवरूपेण हेतुत्वं कल्प्यमतो ज्ञानसुखादीनामिव स्मृतिजन्यसंस्कारस्यापि न क्षणिकत्वं स्वप्रतियोग्यधिकरणतादा

त्यसंबंधेन ध्वंसवत्तायाः संस्कारादौ द्वितीयक्षण एवसंभवादधिकरणत्वं चेह कालिकसंबंधेन प्रवेश्यमतो न नित्यस्य ज्ञानेच्छादेः क्षणि

कत्वाप्रसंग इति मदेकपरिशीलितः पंथाः यत्तु स्मृतिजन्यसंस्कारनाशस्य तत्तच्चरमस्मृत्यनंतरनष्टसविषयकप्रतियोगिकत्वस्य लाघ

वेन कल्पनात्तादृशप्रतियोगिनः प्रथमस्मृत्यनंतरमसत्वात्तत्स्मृतिजन्यसंस्कारस्य क्षणिकत्वमिति। तत्तुच्छं। तथा सति सकृदनुभवज

न्यसंस्कारनाशस्यापि तत्तच्चरमस्मृतिप्रागभावीनसविषयकव्यक्तिप्रतियोगिकत्वकल्पनयात्तद्व्यक्तिविरहादेवनैकस्मरणोत्तरं तदुत्पा

दासंभवे इत्यनुभवत्वेनापि स्मृतिहेतुतायादुरुच्छेदापत्तेः। केचित्तु रूपादिकं प्रतिरूपादेरिव संस्कारं प्रत्यपि समानाकारसंस्कारत्वेनैव प्र

तिबंधकत्वं धारावहनस्थलेनेकसंस्कारव्यक्तिकल्पनामपेक्ष्यतत्कल्पने लाघवात्। एवं वचनकस्यापि संस्कारस्य क्षणिकत्वप्राक्तनसं

स्कारसत्वेन स्मरणाव्यवहितोत्तरक्षणे संस्कारानुत्पादात्तन्नाशोत्तरमुत्पन्नस्य च संस्कारस्य तदानीं नाशकविरहादेव क्षणिकत्वासंभवात्।

नचयत्रैकस्मृत्यनंतरमेवस्मरणांतरम्प्राक्तनसंस्कारनाशोपश्चात्त्वप्रथमस्मरणेन संस्कारोस्यादस्तत्र त्वसंस्कारस्यक्षणिकत्वंदुर्वारंमि
तिवाच्यं। संस्कारस्यकार्यसहवर्त्तित्वेनस्मृतिहेतुत्वादेवस्मृतिद्वितीयक्षणेसमानाकारस्मृत्यंतरासंभादित्याहुः। तन्मंदं। यत्र घटपटाविषया
कारकसंस्कारे। तत्क्रमेणसकृदनुभूतस्यघटस्यपटस्यचप्रत्येकस्मरणं तत्र पुनस्तादृशघटस्यस्मरणानुत्पत्तिप्रसंगात्। क्रमिकस्मर
णाभ्यांसमूहालंबनसंस्कारनाशादृशायामेवघटस्मरणस्यापिनाशान पुनर्घटसंस्कारजननानासंभवादितिदिक्। ननुस्मृतेः स्वसंस्का
रजनकतासत्वएवतद्द्वारास्मृतिजनकत्वंवाच्यं। तदेवासिद्धंसंस्कारंप्रत्यप्यनुभवत्वेनैवहेतुत्वादतस्माह। जायतेचेति। तथाचसंस्का
रंप्रत्यनुभवत्वेनहेतुत्वेदृढतरसंस्कारंप्रतिपुनःपुनःस्मरणत्वेनहेतुतानस्यात्। सामान्यसामग्रीविरहादतसंस्कारंप्रत्यपिनि
श्चयत्वमात्रेणहेतुत्वमितिभावः। मांचस्तु। समानाकारस्मृतित्वेनसंस्कारनाशहेतुतामतेप्यऽनंतात्मगोचरसंस्कारनाशानुरो

धातृपुरुषभेदेनकार्यकारणभावानंत्यमावश्यकमेव। तथाचतत्तदात्मीयसंस्कारंणामान्यनाशंप्रत्येवतत्तदात्मीयचरमस्मृतिव्य
क्तीनांतत्तद्व्यक्तित्वेनहेतुत्वंयुक्तं। अनंतानंतसंस्कारध्वंसकल्पनायांगौरवात्। अवच्छेदकलाघवाच्च। सकलसंस्काराणांच
रमस्मृतिपर्यंतस्थायित्वेप्युद्बोधकविरहेणैवमध्येस्मरणासंभवात्। तथाचसकृदनुभूतस्यापिस्मरणोत्तरस्मरणसंभवादनु
भवत्वेनस्मृतिहेतुतायांबाधकाभावइत्यतउक्तंजायतेचेत्यादीत्याहुः। तच्चिंत्यं। तावतास्मृतेःसंस्कारजनकत्वसिद्धावपिस्मृतिजन
कत्वाप्राप्तेः। यत्रस्वसदृशपदार्थज्ञानत्वादिनानुगतरूपेणोद्बोधकस्यस्मृतिहेतुत्वंतत्रांतरास्मरणधाराप्रसंगाच्च। नव्यास्तुननु
स्मृतेनसमानाकारज्ञानत्वेनहेतुत्वंसकृदनुभवस्थलेस्मृतिन्यानेकसंस्कारकल्पनागौरवापत्तेः। किंतुतादृशानुभवत्वेनैवतथात्वं
नचसंस्कारस्यफलनाश्यतयासकृदनुभूतस्यस्मरणद्वयानुपपत्तिः। चरमफलमात्रवृत्तिस्मृतित्वव्याप्यजातिविशेषेणैवसंस्कार

आह

नाशाहेतुत्वादित्यत्तैर्ज्ञायते चेत्यादि। तथा च दृढतरसंस्कारात्मककार्यप्रयोजकतया सकृदनुभवस्थले पुनः पुनः स्मरणस्य प्रामा

णिकतया न तत्कल्पनागौरवं। किंतु संस्कारनाशकतावच्छेदकतया चरमस्मृतित्वजातिकल्पनायामेव तदिति भाव इत्याहुः। न

नुघटत्वेन संस्कारगताजातिः मानाभावात्। परंतु स्फटियुद्बोधकसंपत्तिः। सा च न कारणनियम्या तस्याः कार्यतानवच्छेदकत्वेपि

क्षतत्वभावात्। नन्वकुतो नुभवत्वेन संस्कारजनकतापरित्याग इत्यत आह। परित्यज्य चेति। तथा च विनाप्यनुभवं स्मृतेरनंतरं संस्कार

स्य संभाव्यतयानुभवत्वं संदिग्धव्यभिचारकं मतो व्यभिचारधिया प्रतिबंधान्न तादृश्येण हेतुत्वं किंतु निश्चिताव्यभिचारके ज्ञानत्वा

नौव ज्ञानं विना संस्कारस्य केनाप्यनंगीकारादिति भावः। अनुभवत्वादिविशेषधर्मं परित्यज्य तद्व्यापकेन निश्चयत्वेन स्मृतिहेतुत्वोप

गमे घटादिकं प्रत्यपि दंडत्वादिकं परित्यज्य द्रव्यत्वादिना हेतुता स्यादत आह। इदमेव चेति। गृह्यमाणाव्यभिचारकेण कारणतावत्कल्प

नानुदय एवेत्यर्थः इंद्रि निश्चिताव्यभिचारकत्वमित्यन्यो अन्यत्र विशिष्टबुद्ध्यादौ। तथा च यत्र विशिष्टबुद्ध्यादौ विशेषणज्ञानत्वादिवि
शेषरूपेण हेतुतायां व्यभिचारग्रहस्तत्रैव विशेषणविषयकत्वादिसामान्यधर्मेण हेतुत्वं घटत्वादौ तु दंडत्वद्रव्यत्वयोर्द्वयोश्च निश्चिताव्यभिचा
रकत्वाद्दंडत्वादिविशेषधर्मेणैव हेतुत्वं न तु तद्व्यापकद्रव्यत्वादिना ताद्रूप्येण हेतुतायामन्यथासिद्धेरिति भावः। कार्यतावच्छेदकत्वं विशेषरूपस्यै
वयुक्तं न तु सामान्यस्य संदिग्धव्यभिचारकत्वादत एव विशेषणज्ञानजन्यत्वं विशिष्टबुद्धौ वनुभवत्वेनैव न तु तादृशज्ञानत्वेनेति। अत्र चैरुक्तमित्या
शयेनाह। हेतुतावच्छेदकत्व इति। ननु स्मृतेः संस्कारजनकत्वेऽप्रसिद्धांतइत्यत आह। अभिहितं चेति स्मृतीनामिति। स्वकार्यः संस्कारो विरोधीना
शकोयासामित्यर्थः। तथा चावयवेभ्यो न वाक्यार्थधीसंभवस्तद्घटकप्रत्येकपदार्थस्मृतीनां तावत्कालमसत्त्वादिति टीकार्थः। साक्षात्तज्जन्यत्वं व्या
पारमद्वारीकृत्य परामर्शजन्यत्वं न तु स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वं। तेन बाधादिस्थलीयपरामर्शात्तृतीयक्षणे जातानुमितौ नाव्याप्तिः। न तु स्वाव्यव

हितप्रत्यक्षकालवृत्तिपरामर्शाजन्यत्वं तदर्थः। स्मृतिविशेषेऽति व्याप्तिवादवध्यातुः। वस्तुविशेषस्मृतिप्रतिसाध्यव्याप्यवत्तानिश्चयत्वप्रकारेणानुगतरूपेऽ
णउद्बोधकस्य हेतुत्वसंभवेतस्यामतिव्याप्तिः। पूर्वकल्पापेक्षया गौरवं च इत्यस्वरसः कश्चिदित्युक्त्या सूचितः। ननु वन्हिव्याप्यादिविशिष्टवैशिष्ट्यबु
द्धौ वन्हिव्याप्यादिप्रकारकनिश्चयत्वेनैव हेतुत्वं न तु ज्ञानत्वमनन्तर्भाव्य विशेषणांशेऽनुद्बुद्धसंस्कारसत्वेपि विशिष्टवैशिष्ट्यप्रत्यक्षापत्तेः। तत्त
द्विशिष्टवैशिष्ट्यप्रत्यक्षं प्रति तत्तद्विशेषणादिज्ञानव्युक्तीनां विशिष्य कारणत्वस्य प्रतिबंधकत्वस्य वा कल्पनायां गौरवं। न च स्मृत्यादिस्थले व्यभिचारः।
अग्रेविरस्यत्वात्। तथा च वन्हिव्याप्यधूमवत्पर्वतवान्नित्याकारकप्रत्यक्षेऽतिव्याप्तिस्तद्वारणार्थं प्रकारांतरानुसरणे ततोपिस्मृत्यतिव्याप्तिनिरासः
संभवतीत्याशयेनाह। किं चेति। तत्र। अनुमितौ। न देवेति। अन्यथा पक्षधर्मिकव्याप्यवत्तादिनिश्चयत्वेन हेतुत्वस्य लक्षणप्रविष्टत्वेऽनुमितिमा

त्रेऽसंभवापत्तेरिति भावः। ननु तद्विशेष्यकतत्प्रकारकस्मृतिं प्रत्यपि तदुभयवैशिष्ट्यावगाहिनिश्चयत्वेनैव हेतुत्वात्तत्रापि व्याप्तिरेवमपीत्यत आ

हृ। एकतरेति तथा चान्वयव्यभिचाराभ्यां क्रमेण तत्तत्र हेतुत्वमिति भावः। ननु जन्यतापि तदुभयवैशिष्ट्यावगाहिस्मृतित्वेनैव वाच्या तथा

च कार्यतावच्छेदकावच्छिन्नस्योत्पादाभ्यां क्रदोषइत्यत आह। अन्यथेति। नियमेन। नियमतः। प्रसंगादिति। एकधर्मिकस्मृतिसामग्र्या एव

अपरधर्मिकस्मृतिसामग्री त्वादिभावेः। अे नियमेन। विशेषतो नियामकाभावेनेत्यपि कश्चित्। ननु तद्विशेष्यकतत्प्रकारकस्मृतौ तादृशनि

श्चयत्वेन हेतुत्वं मयापि वाच्यमेव नातः स्मरणस्योभयविशेष्यकत्वं परं तूभयवैशिष्ट्यावगाहि। निश्चयत्वेनापि हेतुत्वं यद्विशेषयोरिति

न्यादेव वक्तव्यमिति स्मृत्यतिव्याप्तिस्तदवस्थैवेत्यत आह। समानेति। तथा च तत्प्रकारकस्मृतिसामान्यं प्रति तत्प्रकारकज्ञानत्वेनैव हेतुत्व

यैवयद्विशेषयोरिति न्यायस्य सामंजस्यान्न तदुभयवैशिष्ट्यावगाहि निश्चयत्वेनापि हेतुत्वं गौरवादिति भावः। तत्र ज्ञानस्मरणयोः। विशिष्ये

ति। तद्विशेष्यकतत्प्रकारकज्ञानत्वादिनैवेत्यर्थः। नानाविधिव्याप्तेरनुमित्युपयोगित्वमतेनाह। व्रत्यादीति। हेतुतामतश्च्युत्क्या प्रागुक्तदोषः स्

व

चितः। नितरामिति। नातिप्रसंगशंकापीत्यनुषज्यते। तथैवव्यभिचारधीविरोधिधीत्वादिरूपेणैव। अतएवेति। व्याप्यपक्षोभयवैशिष्ट्या
वगाहित्वादिनाजनकत्वस्यलक्षणेप्रवेशादेवेत्यर्थः। ज्ञानत्वेना। निश्चयत्वेनहेतुत्वेपीत्यपिनास्वरसः सूचितः। सचव्याप्यवत्तावच्छिन्नेयो
ग्यानुपलब्धिविरहात्तद्वच्छिन्नाभावस्यातींद्रियतयानतत्प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानंहेतुरभावलौकप्रत्यक्षंप्रत्येव
तस्यहेतुत्वादित्याद्यधिकंसामान्यलक्षणायांवक्ष्यते। ननुव्याप्यपक्षोभयवैशिष्ट्यावगाहिनिश्चयत्वंतदुभयनिरूपितसांसर्गिकविषय
ताकनिश्चयत्वंतथाचलाद्रूप्येणहेतुत्वेवन्हिव्याप्यधूमेपर्वतइतिज्ञानादप्यनुमित्यापत्तिः। पक्षेसाध्यव्याप्याधारत्वावगाहित्वस्यावच्छे
दककोटिप्रवेशेतुपर्वतेवन्हिव्याप्यधूमइत्यादिलिंगधर्मिकपरामर्शस्यासंग्रहः। तत्रव्याप्यांशेपक्षाधेयत्वस्यैवभानात्। किंचपक्षधर्मिक
व्याप्याभावप्रकारकान्यत्वेसतिव्याप्यविशेष्यकपक्षाभावप्रकारकान्यत्वव्याप्यपक्षोभयवैशिष्ट्यावगाहिज्ञानत्वमेवतादृशनिश्चयत्वंवा

च्यं। तथा च न तस्यापि विशेषणविशेष्यभावभेदादुत्तरकार्यकारणभावापत्तिरतो व्याप्यवत्पक्षनिश्चयत्वेनाधेयतयापक्षप्रकारकव्याप्य
धर्मिकनिश्चयत्वेन यथानुभवमनुमितिहेतुत्वं वाच्यं मतस्तादृशस्मृतावतिव्याप्तिस्तदवस्थैवेत्यत आह। व्याप्यविषयकत्वेनेति। नव्या
स्तु व्याप्यपक्षोभयवैशिष्ट्यावगाहिनिश्चयत्वेन हेतुत्वस्य लक्षणघटकत्वेवत्व्याघापत्तावतिव्याप्तिरनुमिताविवापत्तौ च परामर्शस्यै
करूपेण हेतुत्वादत उक्तं व्याप्यविषयकत्वेनेति। तथा चापत्तेः साक्षात्कारतया परामर्शोपनीतव्याप्तेस्तद्विषयत्वनियमान्नातिव्याप्ति
रित्याहुः। तन्मंद। पक्षधर्मांशे गृहीताप्रामाण्यकत्वस्याहार्यत्वस्य वाधिकस्यापत्तिजनकतावच्छेदकत्वात्। अन्यथा स्थाणुत्वाद्यभा
वभ्रमोत्तरस्थाणुत्वादिप्रत्यक्षस्थलेपि व्याप्यदर्शनवशेन स्थाणुत्वादेरापत्तिप्रसंगादिति ध्येयं। एतेन व्याप्यविषयकत्वप्रवेशेनप॰
रास्तमिति परेणान्वयः। विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वेप्यवस्थापिते विशिष्टवैशिष्ट्यबुद्धेरपि विशिष्टबुद्धितया तद्धर्मोपेक्षित॰

स्य विशेषणज्ञानस्यैव विशेषणतावच्छेदकप्रकारकत्वसंभवाद्विशिष्टवैशिष्ट्यबुद्धौ विशेषणतावच्छेदकप्रकारकज्ञानस्य व्यभिचारो
नस्यादित्याशयेनोक्तं विशेषणधिय इति। हेतुत्वस्येति कल्पनादिति परेणान्वयः। ननु संबंधद्वयेनैव हेतुत्वे प्रत्येकं व्यभिचाराद्विशिष्ट
ज्ञानत्वावच्छिन्नं प्रति अनुगतेन हेतुत्वासंभव इत्यत आह। निर्विकल्पकात्मकस्य वा स्मरणस्येति। विशेषणाप्रकारकस्मरणस्येत्यर्थः।
तेन व्याप्यवत्त्वादिस्मरणस्य सविकल्पकत्वेपि न क्षतिः। हेतुत्वस्य कल्पनादिति योजना। तथा च साक्षात्संबंधेनैव सर्वत्र हेतुत्वं न तु संबंध
द्वयेनैवेति भावः। ननु विशिष्टबुद्धित्वं स्मरणस्थले संदिग्धव्यभिचारकत्वान्न विशेषणधीजन्यतावच्छेदकं। किंच समानप्रकारकत्वेन ज्ञा
न स्मृत्योः कार्यकारणभावस्य क्लृप्तत्वान्निर्विकल्पकस्मरणस्यासंभवो पीत्यत आह। अनुभवं प्रत्येवेति। तस्या हेतुत्वस्य कल्पनादित्यन्व
यः। तस्याः विशेषणधियः। ननु एवमपि विषयोपरक्तरूपादिसाक्षात्कारे व्यभिचार एवेत्यत आह। नियमत इति। नियमः कारणत्वं तं

दंगीकृत्येत्यर्थः। तथाच ल्यब्लोपे पंचमी। तेनयत्रापेक्षाबुध्याकृत्यतिर्जनितायत्र वा प्रथमं चिकीर्षा ततोविषयोपरक्तमुपादानप्रत्यक्षं पश्चा

त्कृतिः स्तत्रकृतिसाक्षात्कारपूर्वविषयस्मृत्यकल्पनेपिनासंगतिरित्येयं। नचोक्तप्रणाल्याव्यभिचारवारणेपिज्ञानत्वमंतर्भाव्यहेतुत्वेमानाभा

व इति वाच्यं। विशेषणगोचरानुद्बुद्धसंस्कारदशायाविशिष्टप्रत्यक्षानुत्पत्त्यर्थंतन्निवेशस्यावश्यकत्वादितिभावः। नन्वास्तुयागादिव्यापार

यासिद्धस्यापूर्वस्येवानुभवव्यापारतयासिद्धस्यसंस्कारस्यापिसविषयकत्वेमानाभावात् तद्विशेषणविषयकत्वेनैवविशिष्टबुद्धौहेतुत्वंसं

स्कारद्वारा समानाकारनिश्चयत्वेनैवस्मृतिहेतुत्वेऽप्येतिप्रसंगाभावात्। नचसंस्कारस्यनिर्विषयकत्वेघटपटाविषयनुभवस्ययत्रघटांश

एवोपेक्षात्वंतत्रजादृशंज्ञानस्यघटस्मृत्युपधायकस्वजन्यसंस्कारसंबंधेनसत्वात् घटस्येवपटस्यापिस्मरणस्यापत्तिः। यस्यपुंसः पटा

नुभवानंतरंतत्सदृशवस्तुदर्शनादेवपटस्मृतिस्तत्पुरुषीयपटस्मृतिसामान्यप्रतितदीयतादृशदर्शनत्वेनानुगतरूपेणोद्बोधकस्यहेतुतयातत्सत्व

दशायां तदुद्बोधकविरहस्यापि वक्तुमशक्यत्वादिति भावः। ननु विशिष्टवाच्यः स्वजन्यसंस्कारद्वारा तद्धर्मिकतत्प्रकारकोपेक्षान्यता
दशानिश्चयत्वेन तथाविधस्मृतिं प्रति हेतुत्वादुक्तस्थले च पटोपेक्षान्यत्वविशिष्टस्य पटधर्मिकपटत्वप्रकारकज्ञानस्य स्वजन्यसंस्कारद्वाराऽवि
रहादेव पटस्मृत्यापत्त्यसंभवात्। तथापि संस्कारजनकतायामपि उपेक्षान्यत्वस्य प्रवेशनीयतया॥ गौरवानवकाशात्। अन्यथोक्तस्थल
एव पटत्वप्रकारकसंस्कारस्य दुर्वारत्वापत्तेः। यत्तु स्वध्वंसद्वारैवानुभवस्य स्मृतिजनकत्वसंभवादतिरिक्तः संस्कार एव नास्ति कस्य सविष
यकत्वचिंतेति तत्तुच्छं। यस्य पुंसः यदानुभवो तत्क्रमिकचतुष्यं च प्रत्यक्षादि उत्पन्नं बहिलकाल एव दशादिनेषु पटस्य दशास्मरणान्युपेक्षा
त्मकान्युत्पन्नानि तस्य तद्दिन एव स्मरणोत्तरमपि पटस्य पुनः स्मरणप्रसंगात्। स्वध्वंसद्वारानुभवस्य तत्र सत्वात्। तत्र यद्दशास्मरणे उद्बोध
कदशाकस्य विशेषतो हेतुत्वकल्पनया तत्र स्मृत्यनुत्पादसंपादनादपेक्ष्य संस्कारस्य स्मृतिहेतुत्वकल्पनयैव तत्संपादने लाघवात्। संस्का

त

रस्य फलनाश्यतया प्रथमस्मरणेन तन्नाशादेवास्मन्मते पुनःस्मरणासंभवात्। न चैतत्स्मरणपूर्वक्षण एव तत्तत्स्मरणस्योत्पादप्रसंगे
न संस्कारहेतुत्ववादिनापि तत्प्रतिबोधकस्य विशेषतो हेतुत्वं वक्तव्यमिति प्रांच। प्रत्यक्षादिसामग्र्याः प्रतिबंधकत्वादेव तत्तत्स्मृतिप्रा
क्क्षणे स्मरणासंभवादित्याहुः। केचित्तु स्मृतिनाश्यतावच्छेदकतयैव संस्कारस्य सविषयकत्वसिद्धिस्तद्धर्मिकतत्प्रकारकसंस्कार
नाशं प्रत्येव तादृशस्मृतित्वेन हेतुत्वात्। स्मृतित्वेन सामान्यतः संस्कारनाशं प्रति हेतुत्वे घटस्मरणादेव निखिलसंस्कारनाशादनुभवां
तरं विनोत्तरकाले पटादिस्मरणानुपपत्तेः। न हि तत्र घटस्मृतिरेव स्वजन्यसंस्कारद्वारा पटादिस्मृतिं जनयितुमीष्टे भिन्नविषयकत्वा
त्। अन्यथातिप्रसंगात्। न वा पटादिधीरेव तत्र संभवति। तज्जन्यसंस्कारस्यापि घटस्मृत्यैव नाशात्। न च तद्धर्मिकत्वाद्यपेक्षया लाघ
वेन तद्धर्मिकतत्प्रकारकस्मृतिनाश्यतावच्छेदकसंस्कारनिष्ठवैजात्यमेव कल्पयितुं युक्तं। घटत्वप्रकारकस्मृतिनाश्यतावच्छेदकजातेर्घट

पटोभयानुभवजन्येतदुभयस्मृतिनाश्यसंस्कारेपटत्वप्रकारकस्मृतिनाशतावच्छेदकजात्यासंकरात्। नचतन्त्रोभयगोचरस्मृतिनाश्य
तावच्छेदकंवैजात्यंतरंप्रत्येकस्मृतिप्रयोज्यजातिविरुद्धमेवस्वीकार्यमितिवाच्यम्। तथासत्यनंतजातितदाश्रयकल्पनमनंतनाश्यनाशक
भावकल्पनांचापेक्ष्यसंस्कारस्यसविषयकत्वकल्पनायाएवलाघवेनौचित्यादित्याहुः। ननुतत्पक्षकतद्धेतुकतत्साध्यकानुमितित्वंवि॰
शिष्येवलक्ष्यतावच्छेदकंवाच्यमतआहादेवादिति। सामग्रीवशादित्यर्थः। तथाचवन्हिव्याप्यधूमाद्द्रव्यंपर्वतश्चवन्हिमानित्याकारा
नुमित्यव्याप्तिरितिभावः। ज्ञानवृत्तिज्ञानसमवेतं। तेनसाक्षात्कारत्वादेः कालिकसंबंधेनतादृशज्ञानवृत्तित्वेपिप्रत्यक्षादौनातिव्या
प्तिः। अनुभवत्वव्याप्येति। अनुभवत्वाव्यापकेत्यर्थः। तेनानुभवत्वस्यापिस्वव्याप्यत्वात्तदादायप्रत्यक्षादौनातिप्रसंगः। व्याप्यत्वंभेदग
र्भमित्यपिकश्चित्। यत्किंचिदनुभवावृत्तित्वेनापिजातेर्विशेषणीयत्वमित्यन्ये। जातिपदंसमवायेनहेतुत्वमात्रत्वाभायनातः स्यदादौव्यभि

चारः। अनुभवत्वजातेरसत्वपक्षे स्मृत्यन्यज्ञानत्वमेवानुभवत्वमितित्तद्व्याप्यत्वादृशज्ञानत्वमादायातिव्याप्तिः स्यादतो जातिपदमखंड धर्मार्थ
कमित्यपि वदंति। अथानुभवत्वव्याप्यजातेर्निवेशो मूलोक्तं चरमज्ञानपदं व्यर्थमव्यावर्त्तकत्वादत आह। एतदिति। तथा च न स्वातंत्र्येण
ज्ञानपदार्थप्रवेश इति भावः। पृथगन्वयव्याप्तित्वादिना न क्षतिः। नाव्याप्तिः। यनुमितित्वमादाय सर्वत्रैव लक्षणसत्वादिभावः। अ
नुभवत्वव्याप्यतामनिवेश्य मूलस्थजन्यपदस्य जन्यतावच्छेदकविशिष्टपरतया तदनुसारि लघुलक्षणमाह। पर्वतत्ववन्हिव्याप्ये
ति। अत्रावच्छेदकत्वस्य व्यासज्यवृत्तित्वमते कार्यतावच्छेदकत्वं तत्कोटिनिविष्टतामात्रेण वा व्यम्। अन्यथानुमितित्वस्यापि तादृश
कार्यतावच्छेदकत्वपर्याप्त्यनधिकरणत्वादसंभवापत्तेः। तथा च वन्ह्यनुमितित्वेन जन्यतायां वन्हित्वस्यापि प्रवेशात्तदादाय च न्याप्यादाव
तिव्याप्तिरत उक्तं ज्ञानवृत्तिरिति। ज्ञानसमवेतेति तदर्थः। तेन वन्हित्वादेरपि कालिकादिसंबंधेन ज्ञानवृत्तित्वेपि नोक्तदोषः। चरमज्ञानपद

स्येतल्लाभार्थमेवमणिकृतोक्तत्वादितिभावः। नच तादृशजातिमत्ज्ञानत्वमेव वक्तुमुचितं ज्ञानवृत्तित्वप्रवेशे गौरवादितिवाच्यं ता
दृशजातिमज्ज्ञानत्वं हि तादृशजातिविशिष्टज्ञानत्वं तथा च तस्य लक्षणत्वे सामानाधिकरण्यात्मकवैशिष्ट्यस्य हेतुतावच्छेदकविधया ज्ञान
त्वत्वस्य च प्रवेशे विपरीतगौरवमेवस्यादितिभावः। ननु धूमपरामर्शोत्तरानुमितित्वेन तादृशपरामर्शनाशकानुमितित्वेन वा तादृशपराम
र्शजन्यत्वे तादृशपरामर्शघटकतया ज्ञानत्वस्यापि प्रवेशात्तदादाय ज्ञानमात्रेतिव्याप्तिरत आह। सामानाधिकरण्येनवेति। विशेष्यविध
यावच्छेदके सत्यर्थः। तेन ज्ञानत्वस्यापि तादृशजन्यतया सामानाधिकरण्येपि नोक्तदोषः। वस्तुतस्तु कार्यतावच्छेदकत्वस्य व्यासज्यवृत्तित्वे
प्रसिद्धान्तः। अन्यथा कुत्रापि कार्यतावच्छेदकधर्मस्य विशेष्यविशेषणभेदान्नानात्वप्रसंजनं शास्त्रकृतां विरुध्येत। तथा च वन्ह्यनुमिते
र्जन्यतायामनुमितित्वमेव जन्यतावच्छेदकं वन्हित्वादिकं तु तादृशजन्यतावच्छेदकतायामवच्छेदकमतो नोक्तक्रमेण ज्ञानसाक्षिपदस्यवृत्ति

रुचिता॥ किंतु वन्हित्वावच्छिन्नविधेयकानुमितित्वस्यैव विनिगमनाविरहात्त्वावच्छिन्नविधेयताकत्वसंबंधेनानुमितिवृत्तिवन्हित्वस्या-
पि परामर्शजन्यतावच्छेदकत्वात्तादृशवन्हित्वमादाय वन्ह्यादावतिव्याप्तिवारणार्थमेव ज्ञानवृत्तिपदं। समवायसंबंधेनैव जन्यतावच्छेद
कत्वविवक्षयापि वन्हित्वादेर्वारणसंभवात् ज्ञानवृत्तित्वप्रवेशे गौरवमित्याशयादेव चसामानाधिकरण्येन वेति कल्पांतरमिति युक्तमुत्पश्यामः।
यद्यपि पर्वतवन्हिव्याप्योभयवैशिष्ट्यावगाहिनिश्चयोत्तरज्ञानत्वावच्छिन्नं प्रत्येव लाघवात्तादृशवैशिष्ट्यावगाहिनिश्चयत्वेन हेतुत्वे पर्वतध-
र्मिकवन्ह्यनुमितित्वादेः कार्यतावच्छेदककोटचप्रविष्टत्वादनुमितिमात्र एवोक्तलक्षणस्यासंभवः। तथापि तत्तदप्रामाण्यज्ञानानास्कं-
दिततादृशोभयवैशिष्ट्यावगाहिनिश्चयत्वेनैवानुमितिहेतुत्वं वाच्यं। अन्यथा भ्रमत्वेन गृह्यमाणादपि परामर्शादनुमितिप्रसंगात्।
नच परामर्शमि धर्मिकतत्तदप्रामाण्यज्ञानाभावस्यापि स्वातंत्र्येणैवानुमितिहेतुत्वमतो नोक्तदोषः। तथासति गृहीताप्रामाण्यकस्यै

वपरामर्शस्योत्तरं परामर्शोत्तरोत्पादेप्यनुमित्युत्पत्त्यापत्तेः। एवं च पर्वतत्ववह्निव्याप्योभयवैशिष्ट्यावगाहिनिश्चयोत्तरज्ञानत्वमात्रस्य ता
दृशनिश्चयजन्यतावच्छेदकत्वे गृहीताप्रामाण्यकात्पर्वतत्ववह्निव्याप्योभयवैशिष्ट्यावगाहिनिश्चयोत्तरं स्वसामग्रीवशाज्जायमानाया
पर्वतो द्रव्यत्वस्य चत्वरे वह्नेर्वह्निमत्पर्वत एव वा द्रव्यत्वादेरनुमितौ पर्वतत्ववह्निविधेयकान्वयबुद्धौ धूमेन पर्वतत्ववह्नेरापत्तौ च व्यभिचारः स्या
दित्यवश्यं पर्वतत्ववह्निव्याप्योभयवैशिष्ट्यावगाहिनिश्चयोत्तरपर्वतधर्मिकवह्निविधेयकानुमितित्वावच्छिन्नं प्रत्येव तत्तदप्रामाण्यज्ञा
नानास्कंदिततादृशोभयवैशिष्ट्यावगाहिनिश्चयत्वेन हेतुत्वं वाच्यमित्यनुमितित्वस्यापि कार्यतावच्छेदकेऽनुप्रवेशान्नासंभवः। न च
तत्तदप्रामाण्यज्ञानानास्कंदितपर्वतवह्निव्याप्योभयवैशिष्ट्यावगाहिनिश्चयोत्तरज्ञानत्वावच्छिन्नं प्रत्येव तद्वेतत्तेऽप्रामाण्यज्ञानानास्कंदि
ततादृशवैशिष्ट्यावगाहिनिश्चयत्वेन हेतुत्ववाच्यमतो न व्यभिचारः। पर्वतधर्मिकवह्निविधेयकानुमितित्वापेक्षया गुरुत्वेन तत्तदप्रामा

(त्वावच्छेदेन)

प्यज्ञानाभावकूटस्य तादृशनिश्चयकार्यतावच्छेदककोट्यप्रविष्टत्वात्। अनयोर्बाधाद्यनिश्चय एवेति। एतेन पर्वतत्वावच्छेदेन प्रमेय

त्वौ यैवदिशाग्निमलक्षणेऽव्याप्त्यसंभवो वारणीयइतिपरैरपरशीलितः पंथाः। ननु पूर्वोक्तयुक्त्या व्याप्यपक्षोभयवैशिष्ट्यावगाहिनि

श्चयत्वस्य दुर्वचत्वात्तद्रूपत्वेनानुमितावपि न हेतुत्वमतः कल्पांतरमाह। वन्हिव्याप्यवदिति। केचित्तु वन्हिव्याप्यपक्षोभयवैशिष्ट्या

वगाहिनिश्चयत्वव्याप्यधर्मावच्छिन्नकारणताप्रतियोगिकव्याप्तिविषयकवृत्तिकार्यतावच्छेदिकायाजातिस्त्वद्वत्वमित्यादिलक्ष

णार्थः। तत्र तादृशव्याप्यवन्हिव्याप्यधूमप्रकारत्वान्यप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताकज्ञानत्वावच्छिन्नेत्यर्थः। ए

तेन व्याप्यवत्तानिश्चयत्वघटकदलद्वयापेक्षया लाघवाद्व्याप्यधर्मिकपर्वतनिश्चयत्वेनैव पर्वतो वन्हिमानित्यनुमितौ हेतुत्वादसं

भवोपि सपास्तः। निश्चयत्वं घटकदलद्वयस्याप्रवेशादिति ध्येयं। व्याप्तिज्ञानत्वावच्छिन्नकारणत्वप्रवेशानुमितावसंभवः अनुमिति

मात्रेज्ञानत्वेन वन्ह्याद्यनुमितौ च व्रत्वादिज्ञानत्वेनैव हेतुत्वस्य स्वयं वक्ष्यमाणत्वादतः स्तत्परित्यागः। यद्यपि वन्ह्याद्यनुमितौ व्रत्वा
दिव्याप्यवत्तानिश्चयत्वेनैव समानविशेष्यतावच्छेदकत्वप्रत्यासत्त्या हेतुत्वमुचितं। पूर्वतत्त्वचत्वरत्वाद्यवच्छिन्नपक्षकनिखिलानुमिति
साधारण्यात् तत्तदाव्यक्तीनामपि कचित्तत्त्वतया परेषां विषयविधयेवास्माकं स्वरूपतः स्तत्पुरुषीयत्वस्यावच्छेदककोटिप्रवेशेपि
गौरवानवकाशात्। न च पर्वतत्वाद्यवच्छेदेन साध्यवत्तानुमितौ तदवच्छेदेन वन्हिव्याप्यवत्तानिश्चयत्वेन हेतुत्वमावश्यकं। उक्तक्रमेण हे
तुतायां तदनिर्वाहादिति वाच्यं। तावतापि पक्षतावच्छेदकसामानाधिकरण्येनानुमितौ समानविशेष्यतावच्छेदकत्वप्रत्यासत्त्या परा
मर्शस्य हेतुताया बाधकाभावात्। साध्यव्याप्यवत्तानतिरिक्तवृत्तित्वविशिष्टपक्षतावच्छेदकताघटकसंसर्गावच्छिन्नस्य विशेष्यतावच्छे
दकत्वस्य प्रत्यासत्तित्वे पक्षतावच्छेदकधर्मावच्छेदेनानुमितावप्युक्तक्रमेण हेतुतासंभवाच्च। वस्तुतः पक्षतावच्छेदकावच्छेदेनानुमितौ न

तदवच्छेदेन हेतुमत्तानिश्चयः कारणं किंतु तदवच्छेदेन बाधाद्यनिश्चय एवेति। एतेन पर्वतत्वावच्छेदेन प्रमेयत्वाद्यनुमितेः प्रमेयत्वाद्य
नतिरिक्तवृत्तित्वावगाहनेऽभ्रमत्वापत्तिरित्यपि प्रत्युक्तं। तावतापि वन्ह्यादिसाध्यकानुमितौ समानविशेष्यतावच्छेदकत्वप्रत्यासत्त्या
परामर्शस्य हेतुत्वे बाधकाप्राप्तेः। तथापि साध्यव्याप्यस्य धूमालोकादेरननुगमात्तादृशैकव्याप्यवत्तानिश्चयत्वेन हेतुत्वोक्तावन्य
लिंगिकायां पर्वते धूमस्य चत्वरे चालोकस्य समूहालंबनपरामर्शाज्जायमानायां च साध्यस्यानुमितौ व्यभिचारः स्यात् अतः पक्षी
भूतस्य पर्वतादेरपि विशेष्यतावच्छेदककोटावनुप्रवेशः कृतः। यदि च तत्पुरुषीयवन्हिव्याप्यधूमवत्तानिश्चयत्वेनैव हेतुत्वं तत्पुरुषीयत्र
त्वनुमितित्वेन च कार्यत्वं अत्र च कारणस्य विशेष्यतावच्छेदकत्वमेव संबंधः। कार्यस्य तु तत्तत्पुरुषीयज्ञानीयवन्हिव्याप्यधूमवत्ताप्र
कारतानिरूपितविशेष्यतावच्छेदकत्वविशिष्टमेव विशेष्यतावच्छेदकत्वं संबंधः। तादृशविशेष्यतावच्छेदकत्वं वैशिष्ट्यं तु स्वनिरूपक

ज्ञानोत्तरज्ञानाय त्वस्य सामानाधिकरण्योभय संबंधेन ग्राह्यत्वमित्युच्यते। तदा समानविशेष्यतावच्छेदकत्वप्रत्यासत्त्यापि परामर्शा
नुमित्योः कार्यकारणभावः संभवत्येव। परंतु विषयतायाज्ञानसमानकालीनतया विनश्यद्वस्थपरामर्शेनजनितायाउ अनुमितौ तद्वि
शेष्यतावच्छेदकीभूतपर्वतत्वादौ तदानींतादृशपरामर्शविशेष्यतावच्छेदकत्वस्यासंभवेनैवेदमुपेक्षितमस्माभिरिति ध्येयं। व्याप्तिवि
शिष्टवैशिष्ट्यबुद्धावतिव्याप्तेर्वारणाय व्याप्यविषयकेति न च व्याप्यविशिष्टवैशिष्ट्यावगाहितामात्रस्यैव जन्यतावच्छेदकतया पराम
र्शजन्यतावच्छेदकजातिविरहादेव न तत्रातिप्रसंगः। तथापि विशिष्टस्मरणत्वस्य परामर्शजन्यतावच्छेदकतया तद्वृतिस्मरणेतिव्याप्तिवा
रणार्थं व्याप्यविषयकत्वनिवेशस्यावश्यकत्वात्। व्यक्त्या घापत्तावापत्तित्वं जातिमादायातिव्याप्तिवारकं तदित्यपि केचित्। ननु यत्र व्या
प्यविशिष्टवैशिष्ट्यबुद्धौ धूमत्ववह्नित्वादिना व्याप्यगुंजादिकमेव भातं तस्यापवं व्याप्यविषयकत्वात्तत्रातिव्याप्तिरतो लाघवादाह। व्या

मितिज्ञानं इति। तादृशानुमित्यविषयीभूतघटादिविषयकत्वस्य व्याप्यविशिष्टवैशिष्ट्यबुद्धावपि सत्वात् ज्ञानसमानान्तं। व्याप्तिज्ञानेऽवश्यंभा
समानं साध्यतावच्छेदकीभूतं वन्हित्वादिकमपि तद्विषयकत्वं चानुमितावसंभवीत्यत उक्तं। तादृशानुमित्यविषय इति। तथा च तादृशं य
द्भावत्वधूमत्वादिविषयकत्वमेव विशिष्य वक्तव्यमिति भावः। ननु वन्हिव्याप्यालोकपरामर्शजन्यायां पर्वतो वन्हिमानित्यनुमितौ व्यभि
चाराद्वन्हिव्याप्यधूमवत्पर्वतनिश्चयत्वेन नानुमित्युक्तलक्षणसंभवः। न च पर्वतधर्मिकवन्हिव्याप्यधूमवत्तानिश्चयविशिष्टानुमि
तिमत्येव तादृशनिश्चयत्वेन हेतुत्वं वैशिष्ट्यं चाव्यवहितोत्तरत्वसंबंधेन तत्र लक्षणद्वयसाधारणं तेन विनश्यदवस्थधूमपरामर्शस्थली
यानुमितावपि तदपेक्षेति वाच्यं। अव्यवहितोत्तरत्वस्य संबंधत्वे मानाभावात्। तादृशनिश्चयसामान्याव्यवहितोत्तरत्वाप्रसिध्या तत्तत्परा
मर्शाव्यवहितोत्तरत्वसंभवात् व्यक्तीनामननुगतानामेव निवेश्यत्वेऽनुगतकार्यकारणभावासंभवाच्च। नापि धूमलिंगकपर्वतधर्मिकवन्हि

मत १

विधेयकानुमितिंप्रत्येवतादृशनिश्चयत्वेनहेतुत्वं। धूमलिंगकत्वंतु धूमान्यमात्रलिंगिकायावंतोनुमितिव्यक्तयःस्तावच्छेदकूटवत्वम
तोनव्यभिचारइतिवाच्यं। तथासतितावच्छेदकूटानांविशेष्यविशेषणभावभेदादनंतकार्यकारणभावप्रौव्येलाघवेनतत्तदनुमितिव्य
क्तित्वावच्छिन्नंप्रतितत्तत्परामर्शव्यक्तित्वेनहेतुत्वस्यैवोचितत्वादित्यतःस्वयंलक्षणमाह। यांकांचिदित्यादिना। नचवन्हिव्याप्यधूमव
त्पर्वतनिश्चयत्वेनकारणतायाःसंस्कारान्यतादृशनिश्चयनाशकविशिष्टानुमितित्वमेवकार्यतावच्छेदकमित्युक्तलक्षणमेवसम्यगि
तिवाच्यं। धूमपरामर्शंगोचरकामिनीजिज्ञासाऽनंतरोत्पन्नतादृशपरामर्शेनस्वविनाशदशायामुत्पाद्यानुमितेरसंग्रहापत्तेः। कामिनीजि
ज्ञासायाप्रतिबंधकत्वेनेष्टसाधनतादिज्ञानविरहेणचतादृशपरामर्शद्वितीयक्षणेसंस्काराभिन्नस्यज्ञानेच्छाद्युत्पादेरुक्तस्यसंभवात्। ए
वंसिध्यात्मकधूमपरामर्शोत्तरमुत्पन्नेनापेक्षाबुध्यात्मकलोकपरामर्शेनजनितायांव्रत्यनुमितौव्यभिचारात्। ज्ञानादिनाशंप्रतित्वावे

नस्वोत्तरोत्पन्नत्वेनैवजनकतया। धूमपरामर्शोत्तरजातसंयोगादेरपितन्नाशकतयातद्विशिष्टायांमालोकलिंगकानुमितावपिव्यभि
चाराच्च। अतएवधूमपरामर्शनाशकानुमितित्वावच्छिन्नंप्रत्येववन्हिव्याप्यधूमवत्तानिश्चयत्वेनहेतुत्वं। नचविनश्यदवस्थधूमपरा
मर्शजन्यानुमित्यसंग्रहः। तत्रविशिष्यैवतत्तत्परामर्शव्यक्तीनांकार्यकारणभावस्वीकारात्। तदतिरिक्तस्थलएवोक्तानुगतरूपेणहे
तुत्वसंभवात्। नचविनश्यदवस्थपरामर्शजन्यानुमितिदशायामपिपरामर्शनाशकानुमित्यापत्तिः सामग्रीसत्वादिति वाच्यं। कार्यस
हवर्तित्वेनैवधूमपरामर्शत्वेनहेतुत्वस्योक्तत्वादित्यपिपरास्तं। धूमपरामर्शव्यधिकरणानुमितिव्यक्तीनामपिस्वोत्तरोत्पन्नत्वेनतादृशप
रामर्शनाशकतयातत्रैवव्यभिचारादिति। नव्यास्तुवन्हिव्याप्यधूमवत्पर्वतनिश्चयविशिष्टानुमितिंप्रत्येवतादृशनिश्चयत्वेनहेतुत्वं॰
वैशिष्ट्यंचात्रस्वसामानाधिकरण्यस्ववृत्तिप्रागभावप्रतियोगित्वोभयसंबंधेनग्राह्यं। वृत्तिरपिकालिकीनिवेश्येतिनोक्तलक्षणस्यासं

भवः॥ न च विनश्यदवस्थपरामर्शजन्यानुमित्यसंग्रहः। तत्तदनुमितौ परामर्शव्यक्तीनां विशिष्यैव हेतुत्वात्तरस्यवक्तव्यत्वात्। वस्तुतो वह्नि
आप्यधूमवत्त्वत्वनिश्चयविशिष्टवृत्तिमदनुमितिं प्रत्येव तादृशनिश्चयत्वेन हेतुत्वं वाच्यं। तेन विनश्यदवस्थपरामर्शस्थलीयानुमितेर्नासंग्र
हः॥ अत्र च निश्चयस्य वैशिष्ट्यं पूर्ववत्। स्वसामानाधिकरण्यस्ववृत्तिप्रागभावप्रतियोगित्वोभयसंबंधेन निवेश्यं तादृशवृत्तिमत्त्वं तु स्व
सामानाधिकरण्यसंबंधेन वाच्यमतो न कोपि दोषः। सर्वत्रैव जीवनयोनियत्नमादाय कार्यतावच्छेदकसंपत्तेः॥ न च यत्र धूमपरामर्शोत्तरं
तद्धर्मिकाप्रामाण्यग्रहात्मकालोकपरामर्शस्योत्पाददशायां बाधादिनिश्चयस्य ध्वंसः तदुत्तरं च वह्न्यनुमितेरपि निरुक्तवृत्तिमदनुमि
तित्वात्तदव्यवहितप्राक्काले चाप्रामाण्यज्ञानभावविशिष्टधूमपरामर्शस्यासत्त्वाद्व्यभिचार इति वाच्यं। अप्रामाण्यज्ञानव्यक्तीनामपि
विशेषत एवोत्तेजकतया तत्र तत्तद्व्यक्तिरनुत्तेजकत्वेपि क्षत्यभावात्। एवं च परामर्शधर्मिकाप्रामाण्यज्ञानाभावकूटस्य स्वातंत्र्येणानु

मिति प्रयोजकत्वमते वन्हिव्याप्यधूमवत्तानिश्चयविशिष्टवृत्तिमत्त्वावच्छिन्नं प्रत्येव तादृशनिश्चयत्वेन हेतुत्वादनुमितित्वस्य जन्यतान
वच्छेदकत्वाऽजातिघटितलक्षणस्यासंभवः स्यादतः स्वयं लक्षणमाह। यां कांचिदित्यादिनेति प्राहुः। यत्तु वन्हिव्याप्यधूमवत्पर्वतनि
श्चयत्वपदेन मानसत्वव्याप्यपरामर्शत्वजातिरूपत्वा। क्षितेतितदवच्छिन्नकारणतामत्र भिन्नैवोक्तलक्षणसंभवः। प्रागननुभूतसाध्या
दि परामर्शादप्यनुमित्युत्पत्त्या परामर्शत्वजातेर्न स्मृतित्वव्याप्यशंकापीति मतं तन्तुच्छं। निश्चयत्वांतेन परामर्शत्वजात्युपलक्षणेव्यापत्स्यविष
यकवृत्तीत्यस्य ज्ञानवृत्तिरित्यादेश्च व्यर्थतापत्तेः। नवा परामर्शत्वस्य जातित्वे प्रमाणमस्ति। तुल्यन्यायतयोपायेच्छाप्रवृत्त्यादिजनकतावच्छेद
कत्वेन सिद्ध्याऽदृष्टसाधनताज्ञानत्वादिजात्यासांकर्यात्। किंचानुमितित्वावच्छिन्नं प्रतिज्ञानत्वेनैव हेतुत्वसंभवात्तादृशजातौ मानाभावः। घटा
द्यावरण्यस्तदंडादेरिवानुमितौ ज्ञानमात्रस्य स्वरूपयोग्यत्वेऽपि क्षतिविरहात्। किंचानुमितिसामान्ये परामर्शत्वजात्या हेतुत्वस्वीकारेऽपि प्रत्यक्ष

१ वह्निविषयकपरामर्शत्वेन हेतुत्वे

नुमितित्वावच्छिन्नं प्रत्यनुगतनियामकालाभः। वह्निविषयकाद्द्रव्यादिसाध्यकपरामर्शादपि वह्न्यनुमितिप्रसंगात्। नच पर्वतधर्मिकवह्न्यनुमिति
त्वस्य कार्यतानवच्छेदकत्वात्तदवच्छिन्नस्योत्पत्तावापादकाभावः तादृशानुमितित्वस्यापि परामर्शधर्मिकाप्रामाण्यज्ञानाभावस्य पक्षतावि
शेषस्य वा कार्यतावच्छेदकत्वेन तदवच्छिन्नस्यायत्निर्संभवादिति। इदं त्ववधातव्यम्। पर्वतधर्मिकवह्न्यनुमितित्वावच्छिन्नं प्रतिजनकतावच्छे
दकतया धूमालोकादिनानाहेतुकवह्निपरामर्शसाधारणी भ्रमत्वज्ञानास्कंदितव्याप्यवत्तानिश्चयव्यावृत्तमानसत्वव्याप्यपरामर्शत्वजा
तिः कदाचित्कल्पयितुं शक्यत एव। यदि चालोकयादिपरामर्शात् क्षणविलंबिनैवानुमितिः। द्रव्यत्वगुणवत्त्वयोः समूहालंबनपरामर्शाद्द्रव्यत्वव
न्त्वयोर्नानुमितिः। किंतु प्रत्येकस्यैव परामर्शात्। अन्यथा तदुभयजनकतावच्छेदकजात्योस्तत्रैव संकरापत्तेः एतेन धूमादिलिंगकत्वमेव धूमादि
परामर्शजन्यतावच्छेदकं। तत्रानुमितित्वव्याप्यवैजात्यपि मतं व्याख्यातमिति दिक्। केचित्तु वह्निव्याप्यधूमवत्पर्वतनिश्चयत्वेनैव हेतुत्वम्। अन्य

राम

५८

तानुतादृशधूमविशिष्टपर्वतधर्मिकवन्ह्यनुमितित्वेनैव। नच धूमवत्पर्वतधर्मिकवन्ह्यनुमितित्वेनैव लाघवादस्तु जन्यतेति वाच्यम्। ना
नाविधव्याप्तेरनुमित्युपयोगितया जनकज्ञानविषयीभूतव्याप्तीनां विशिष्यानुमितौ कार्यतावच्छेदकत्वात्। एकविधव्याप्तेरेवानुमितिप्रयो
जकत्वे तु धूमवत्पर्वतत्वावच्छिन्नधर्मिकवह्न्यनुमितित्वेनैव जन्यत्वं वक्तव्यम्। लिंगोपधानस्याचार्यसंमतत्वेन तस्यैव परामर्शजन्यतावच्छेदक
त्वौचित्यात्। तथाच पूर्वोक्तलक्षणमेव सम्यक्। नचानुमितिमात्रस्य पक्षे हेतुत्ववगाहित्वे यत्र बाधादिकालीनपरामर्शोत्तरं पक्षे हेत्वभावस्य
दोषजं लौकिकं वा प्रत्यक्षं तत्रानुमितिर्न स्यादिति वाच्यं। इष्टत्वात्। नचैवं सति तदानीं तन्मते प्रत्यक्षाद्युत्पादे साक्षात्कारादिकं प्रत्यनुमिति
सामग्र्या विरोधितायां सिध्यभावस्येव पक्षधर्मिकहेत्वभावनिश्चयाभावस्यापि प्रवेशो गौरवं स्यादिति वाच्यं। मणिकृन्मतेपि यत्र सिध्यंशे
भ्रमत्वज्ञानात्मकस्यैव परामर्शस्योत्तरं पक्षे हेत्वभावस्यनिश्चयस्तदुत्तरमनुमितेरुत्पत्त्यर्थं सिद्धेरनुमितिविरोधितायां तत्वदप्रामाण्यज्ञा

नाभावस्य प्रवेशे गौरवस्य तुल्यत्वात्। अस्माकं तु हेत्वभावनिर्णयेन प्रतिबंधात् तत्रानुमितेरनुत्पत्त्या सिद्धेर्विरोधितायां तत्तद्ग्रामा॰
ण्यज्ञानाभावस्याप्रविष्टत्वात्। यत्तु लिंगोपधानमते ऽनुमितिमात्रस्यैव विशिष्टवैशिष्ट्यबुद्धित्वेन तन्निष्ठसाध्यव्यावृत्ता परामर्शजन्यत्वं वन्हिव्या
प्यधूमवत्पर्वतत्वावच्छिन्नविषयताकत्वेनैवावच्छिद्यते। तादृशप्रत्यक्षादिसाधारण्येन कृप्तत्वात्। ननु वन्हिव्याप्यधूमवत्पर्वतधर्मिकवह्न्यनुमि
तित्वेन कार्यकारणभावांतरकल्पनागौरवादिति। कुतः परामर्शजन्यतावच्छेदकीभूतमनुमितित्वमादाय प्रागुक्तलक्षणसंभवः। न च तत्तत्सा
ध्यकानुमितित्वस्य परामर्शजन्यतानवच्छेदकत्वे वन्हिव्याप्यविशिष्टपर्वते वन्हेरनुमितिदशायां घटादेरपि तादृशपर्वतेऽनुमित्यापत्तिः।
पर्वतधर्मिकघटविधेयकानुमितित्वस्यापि घटसाध्यकपक्षताजन्यतावच्छेदकतया तदवच्छिन्नस्यापादनसंभवादिति वाच्यं। लिंगोपधानप
क्षे पर्वतधर्मिकघटानुमितिमात्रस्यैव घटव्याप्यवत्पर्वतत्वावच्छिन्नविषयताकत्वनियमेन तदवच्छिन्नं प्रति हेतो र्घटव्याप्यवत्पर्वतनिश्चय

मनुभवान्यासमवेतेति। अनुमितित्वस्यापि कालिकादिसंबंधेनानुभवादन्यत्र वृत्तेः समवेतत्वप्रवेशः। तादृशधर्मात्मकस्यानुमि-
तित्वस्य कालिकादिसंबंधेनेतरभेदव्यभिचारित्वात् समवायेन तस्य हेतुत्वलाभार्थं समवायित्वमित्युक्तं। ननु स्वर्गोऽयमनुमितो स्वर्ग-
मनुभवामीत्यनुव्यवसायविरहात्साक्षात्कारत्वमेवानुभवत्वं। तथा चानुभवत्वान्येत्यस्य वैयर्थ्यमेव। तद्व्यक्तिसमवेतत्वदले नैव प्रत्यक्ष-
त्ववारणात्। तत्परित्यागे त्वनुमितित्वमप्यनुभवान्यसमवेतमिति असंभवः। तत्रानुभवपदस्य स्मृत्यन्यज्ञानपरत्वे च स्मरणान्यज्ञानभि-
न्नासमवेतत्वं फलितार्थमपेक्ष्य स्मरणासमवेतत्वमेव लघुतरं निवेशयितुमुचितमित्याशयेनाह। अनुभवेत्वेत्यादि। नव्यास्तु यां
कांचिदनुमितिव्यक्तिमित्यस्यानुमितिः स्मृतिभिन्नाऽऽत्याकारानुमितिव्यक्तिमित्यर्थः। तद्व्यक्तिसमवेतेत्यस्य तस्याः स्वादृशानु-
मितयो व्यक्तिविषयतासंबंधेनाश्रयस्तत्समवेतेत्यर्थः। तदाश्रयसमवेतं स्मृतित्वाभवत्वं च तथा चानुभवत्वमादाय प्रसक्तादव-

तिव्याप्तेर्वारणायानुभवत्वान्येति। सकलानुभववृत्तिभिन्नार्थकं तादृशानुमितिविषयनिष्ठस्यस्मृतित्वस्यवारणार्थमनुभवान्या
समवेतेति। अथानुभवत्वं नजातिकिंतुस्मृत्यन्यज्ञानत्वं। तथाचतदन्यत्वनिवेशोव्यर्थः। एवंस्मृत्यन्यज्ञानभिन्नासमवेतत्वरूपमनुभ
वान्यासमवेतत्वमपेक्ष्यस्मरणासमवेतत्वमात्रलघुतरंतावतैवस्मृतित्वस्यवारणसंभवादत आह। अनुभवत्वंजातीतिप्राहुः। ज्ञानत्वादि
वारणायस्मरणासमवेतेति। यद्यपीप्रत्यक्षासमवेतेत्युक्तावपितद्वारणसंभवः। तथापिप्रत्यक्षासमवेतत्वघटितनिरुक्तावनुभवत्वजातेरंगीकारे
ऽनंगीकारेचोभयथैवसम्यक्त्वं। तस्यतुतदनंगीकारएवसम्यक्त्वमितिविशेषः। व्याप्तीत्यादि। व्याप्यविशिष्टवैशिष्ट्यबुद्धिवारणार्थमव
च्छिन्नांतंकार्यताविशेषणं। व्याप्तिविशिष्टबुद्धिवारणाययरामर्शत्वावच्छिन्नकारणतेत्यादि। यद्यपिधूमलिंगकवह्न्यनुमितित्वमेव
धूमघटितव्याप्तिज्ञानत्वस्यजन्यतावच्छेदकंतदवच्छिन्नंप्रतिचनवह्निव्याप्यधूमवत्पर्वतनिश्चयत्वेनहेतुत्वं। धूमलिंगिकायांमहानसंव

न्हिमदित्यनुमितौ व्यभिचारात्। किंतु पर्वतपक्षकतादृशानुमितित्वावच्छिन्नं प्रत्येव तथात्वेन हेतुत्वं। तथा च एकावच्छेदेन व्याप्तिज्ञान

परामर्शोभयजन्यत्वाभावादनुमितावसंभवः तथापि धूमघटितव्याप्तिज्ञानस्य स्वजन्यपरामर्शद्वाराऽनुमितिकरणतायां धूमलिं

गकपर्वतपक्षकवन्ह्यनुमितित्वस्यैव कार्यतावच्छेदकत्वादेकावच्छेदेनोभयजन्यत्वसंभवः। अन्यथा धूमगतव्याप्त्यवगाहिना वन्हिव्याप्यालो

कपरामर्शेन जनितायां पर्वतो वन्हिमानित्यनुमितौ व्यभिचारेण स्वजन्यपरामर्शद्वारा धूमीयव्याप्तिज्ञानस्याप्यनुमितिकारणत्वानुपपत्तिरि

त्याशयः। जन्यतावच्छेदकावच्छिन्नांतभागस्यैतादृशव्याप्तिज्ञानजन्यतावच्छेदकधर्मघटितरूपावच्छिन्नार्थकत्वाददोषइत्यप्याहुः। अत्र

पूर्वोक्तयुक्त्याऽनुमितौ परामर्शत्वेन हेतुत्वासंभवो न वा व्याप्तिज्ञानत्वेन तथात्वमनुमितिसामान्ये ज्ञानत्वेनैव हेतुत्वस्यानेनव्यवस्थाप्यत्वादित्यस्वरसः

केचिदित्यनेन सूचितः। मिश्रमतमाह परे त्विति। पक्षोज्ञाजन्यत्वस्य शाब्दाद्याभावार्थमाह। विशेषणमिति। ज्ञानरूपविशेष्यान्वयि यत्तज्जन्यत्वं तेन।

न्वितमित्यर्थः। पक्षधर्मताज्ञाने सत्त्रपक्षतावद्वृत्तित्वघटकतया सहवृत्तत्वसंबंधेन साक्षादेव वा पक्षत्वं ज्ञाने विशेषणमिति भावः। यथोक्ताया
इति। विशिष्टाभावरूपायाः पक्षतायाः प्रत्यक्षस्य वारणायेत्यर्थः। ननु विशिष्टाभावरूपायाः पक्षतायाः कालाद्यतींद्रियघटितत्वान्न स्वगोच
रप्रत्यक्षे हेतुत्वमत आह। विशेष्येति। विशेष्यसिद्धिः। तथा च पत्पक्षसाध्यस्थले सिद्धिदशायां कदाप्यनुमितिर्न जाता तत्र सिध्यभावमात्रप
क्षता सा त्वयोग्यत्वात्प्रत्यक्षे हेतुरेवेति तत्रैवातिव्याप्तिरिति भावः। ननु पक्षविशेष्यकसाध्यप्रकारकनिश्चयत्वमेव सिद्धित्वं तदवच्छिन्नाभावः
श्च न योग्यः निश्चयत्वस्यातींद्रियेश्वरज्ञानादिघटितत्वात्। तादृशनिश्चये वा प्रामाण्यज्ञानाद्यनास्कंदितत्वप्रवेशो सुतरामयोग्यमत आह
आदीति। विशेषणाभावरूपाया वेति तदर्थः। तथा च यत्र स्थलविशेषे सिद्धिकालीनपरामर्शसमकालीनैकविधानुमित्सयैवानुमितिर्जनिता
तत्र विशेषणाभावरूपतादृशानुमित्सैव पक्षतेति तत्प्रत्यक्षेऽतिव्याप्तेर्वारणार्थं परामर्शोपादानमिति भावः। तत्त्वेनेति। परामर्शत्वेनेत्यर्थः। तत्त्वे

नजनकतायाः फलमाह। तेनेति। बाधादीत्यादिना सत्प्रतिपक्षपरिग्रहः। तथा च तदानीमनुमितिसामग्र्यभावान्न तत्संभावना पीति। प्रतियोगी
ति। पक्षतायां प्रतियोगिनीयासिद्धिस्तद्विषयकेनेत्यर्थः। तथा च सिध्यभावत्वे लौकिकप्रत्यक्षत्वरूपैकधर्मावच्छिन्नं प्रत्येव विषयविधया सिध्यभा
वस्य सिद्धित्वरूपप्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानत्वेन च परामर्शस्य हेतुत्वमिति भावः एकावच्छेदेनेत्यस्य फलमाह। तदुभयेति
। पक्षतापरामर्शौ भयेत्यर्थः। न च परामर्शप्रत्यक्षे विषयत्वादिनैव तस्य हेतुत्वं न तु परामर्शत्वेनेति प्रागुक्तं। तथा च तत्त्वेन जनकत्वविवक्षयैव समू
हालंबनव्युदासः संभवतीति वाच्यं। वन्हिव्याप्यधूमवत्पर्वतं जानामीत्याकारकस्य परामर्शानुव्यवसायस्य ज्ञानधर्मिकव्याप्यविशिष्टवैशि
ष्ट्यबुद्धित्वयात्रपर्वतधर्मिकव्याप्यप्रकारकनिश्चयत्वेन हेतुत्वस्यावश्यकत्वात्। यद्यपि पक्षताजन्यतावच्छेदकं तत्पक्षकतत्साध्यकानुमि
तित्वं। तत्त्वन परामर्शजन्यतावच्छेदकं तल्लिंगकत्वस्याप्यधिकस्य तत्र प्रवेशादित्येकावच्छेदेन तदुभयजन्यत्वं मनुमितावप्यसिद्धं। तथापि प

ताजन्यतावच्छेदकघटितधर्मावच्छिन्नपरामर्शजन्यत्वं विवक्षितं। पक्षताया अपि लिंगविशेषनियंत्रितत्वमग्रे वाच्यमतो नोक्तदोषः। वस्तुतो वि
षयितासंबंधेनैव तदुभयजन्यतयोरवच्छेदकस्यैक्यं वाच्यं। तथा च विषयविधया परामर्शजन्यतावच्छेदकस्यैव वन्हिमत्पर्वतस्य पक्षताजन्यताया
मपि विषयितयावच्छेदकत्वान्नोक्तदोषः। एतेन पक्षताजन्यत्वेऽसत्त्वाभावजन्यत्वमेव लाघवात्प्रवेश्यतुमुचितं। विशिष्टवैशिष्ट्यबोधस्य सत्त्वाभावनि
श्चयाभावजन्यत्वेऽपि धर्मितावच्छेदकनियंत्रितस्य तज्जन्यतावच्छेदकनस्य विशेषणतावच्छेदकप्रकारकनिश्चयजन्यतानवच्छेदकत्वादेकाव
च्छेदेनाभावपरामर्शोभयजन्यत्वाभावोऽरवतत्राव्याप्त्यसंभवादिति परास्तं। विषयविधया बाधनिश्चयाभावजन्यतावच्छेदकस्यैव विषयतया
विशेषणतावच्छेदकप्रकारकनिश्चयजन्यतावच्छेदकतया तत्रैवातिव्याप्तिप्रसंगादिति दिक्। नाव्याप्तिरिति। अन्यथा एकसाध्यादिकमंतर्भाव्य
परामर्शाद्युपादनेऽन्यसाध्यकानुमितावव्याप्तिः स्यादिति भावः। तत्त्रित्वमिति। पूर्वोक्तयुक्त्या परामर्शत्वेनानुमितिहेतुत्वमेव नास्ति पक्षतायाः

श्च हेतुत्वमंशे स्वयं निराकर्तव्यमित्यादिकमत्र चिंताबीजं। नवेति। वाच्यमित्यग्रेण। न्वय व्याप्तिज्ञानं त्वमिति व्याप्तिप्रकारकज्ञानत्वमित्यर्थः। नचप
रामर्शजन्यज्ञानकरणत्वस्वरूपे ऽनुमानलक्षणे व्याप्तिज्ञानत्वत्वेन तस्याप्रवेशान्नवैयर्थ्यमिति वाच्यं। व्याप्तिप्रकारकनिश्चयत्वावच्छिन्नका
रणताघटितनिरुक्तेस्तद्घटितमूर्तिकत्वात् व्यापकत्वाविशेषात्मनः कारणत्वस्य तादृशनिश्चयत्वत्वेन निश्चयत्वग्रहं विना दुर्ग्रहत्वादिति भावः
। तादृशनिश्चयवदन्यावृत्तितत्कत्वरूपव्याप्तेः कारणताघटकत्वेताह। व्याप्तिज्ञानमेवेति। व्याप्तिप्रकारकज्ञानमेवेत्यर्थः। ननु साध्यादिभेदेन
व्याप्तेर्विभिन्नतया व्याप्तिज्ञानत्वादिकंमनुमानमात्रस्य पक्षत्वे भागासिद्धमतो व्याप्तिविशिष्टज्ञानजन्यज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्करणं
त्वहेतूकर्तव्यमत आह। व्याप्तेरिति। अधिकस्य तादृशजातिमत्करणत्वस्य भागासिद्धीति तथा च व्यभिचारावारकत्वाद्वैयर्थ्यमेवेति भावः। फले
ति। अनुमितित्वरूपं यत्सत्वं तदुपधायकस्यैव लक्ष्यतया स्वेतरभिन्नत्वेन ज्ञाप्यतया व्याप्तिज्ञानत्वस्य चानुमित्यनुपधायकवृत्तित्वेन व्यभिचारित्वान्न

हेतुत्वमतस्तादृशजातिमत्फलोपहितकरणत्वमेव हेतुत्वमिति भावः। स्वरूपयोग्यस्य लक्ष्यत्वेपि न क्षतिरित्याशयेनाह। करणेति। तथा
च धर्मभेदान्नवैयर्थ्यमिति भावः। ननु करणत्वं करणतावच्छेदको धर्मः स च प्रवृत्तेव्याप्तिप्रकारकज्ञानत्वमेवेति न धर्मभेदः संभवतीत्यत
आह। व्यतिरेकेति। व्यतिरेकिणी साध्याभावस्यैव हेत्वभावव्याप्यताग्रहान्नवैयर्थ्यशंकेति भावः। तत्रेत्यादिमूलस्य लक्षणपरीक्षयो
रनुपयोगादन्यथा तदुत्थापयति। लिङ्गस्येति। अनित्यलिंगानां दृष्टादिद्वारा कदाचिदिंद्रियोपजीवकत्वसंभवान्नित्यत्वपीतिपर्यन्तानु
सरणं। अनुमितिकरणस्य तत्सामान्यस्य ज्ञानेति ज्ञानाकरणकज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वमर्थः। तेन विशिष्टवैशिष्ट्यादिप्रत्यक्षेणाव्याप्तिः।
साक्षात्कारत्वादिस्वरूपलक्षणं तरस्य ज्ञानहेतुकस्यैवातिरिक्तानुमानस्य च संभवान्नेदं युक्तमित्यस्वरसेन कश्चिदित्युक्तं। ननु तादृशजातिम
त्करणत्वहेतुनेतरभेदसाधने जाति ~~हुं।नेत्रिंसं।कार्यमात्रंप्रत्यकारणं~~ मदंत भागो व्यर्थः। चक्षुषादेरप्यनुमानतयात्करणत्वमात्रस्यैव हे

तुत्व संभवादित्यत्रतस्त्वेत्यादि मूलमिति तु नव्याः के। चित्तु लिंगस्य करणत्वे जगत एवानुमानत्वयात् तदितरा प्रसिध्या कथमुक्तलक्षणस्येतर
भेदानुमापकत्वमतस्तत्रेत्यादीति प्राहुः। तन्न चिंत्य। कार्यमात्रं प्रत्यस्य कारणे परिमांडल्यादावेवानुमितिकरणे। तरत्वस्य प्रसिद्धिसौलभ्यादाचा
र्यमते ऽपि तद्धेतुकानुमितौ परामर्शस्यैव कारणत्वादिति दिक्। ननु बोद्धस्यानुमानत्वाप्रसिध्यात् दृष्येण पक्षता संभवा द्याच ष्टे। अनुमानत्वे
नेति। अनुमानत्वाप्रसिध्या तदभिमतत्वमपि तथैवेत्यतो विष्टाह। धूमेति। अनुमानशब्दस्य लाक्षणिकत्वाप्रतेः कल्पांतरमाह। असदिति।
पारमार्थिके धूमादिज्ञाने ऽसतोनुमानस्य संबंधायोगादनुमितिकरणत्वविशिष्टस्यालीकांतरवंद्सत्वमिति भावः। निर्विकल्पकसमान
विषयकत्वरूपसंवादस्य संभावनायामसंभवादाह। संवादाभिमानेति। संवादासंभवे बीजमाह। संभावितस्येति। असत इत्यत्रैव हेतुरनुगता
कारस्येति वन्हित्वाद्यनुगतधर्मवत ऽत्यर्थः। अध्यक्षेणानुगताकारस्यानुल्लेखे हेतुगर्भं विशेषणमाह। परमार्थेत्यादि। परमार्थसत्वे मेवल॰

आ॰ क्षं॰ नु॰

९५

65

क्षणं व्यावर्तकं यस्य तन्मात्रसाक्षिणोऽयमर्थः। परेषाम भेदेनैव धर्मधर्मिभावादिति भावः। विकल्पद्वयेपि परस्परसंवादव्यवहारात्प्रकारान्तरेण संवादपदार्थं निरूपयन्नाह। अध्यक्षेत्यादि। संभावितस्येत्यनुषज्यते। तथा च संभावितस्याध्यक्षमूलकविकल्पोल्लिखितत्वादध्यक्षमूलकविकल्पविषयविषयकरूपसंवादः संभावनायामस्त्येवेति भावः। विकल्पसमानविषयकत्वस्यानादिवासनामूलकेशाग्रागंगादिविकल्पेति प्रसक्तत्वादध्यक्षमूलकत्वेन विकल्पो विशेषितः। समयादीनां ज्ञानमात्रस्योपयोगे तत्संभावनासहकारेणैव शब्दादेः प्रामाण्यं स्यादतयुक्तं निर्णय इति। आदिना तात्पर्यनिर्णयादेः परिग्रहः। अप्रमाणस्य धर्म्यंशहेतुतायां चक्षुरादौ व्यभिचारादाह। प्रमाणतेति। न चेन्द्रियत्वमिव व्याप्तिनिश्चयत्वमपि प्रमाणताप्रयोजकमनस्तत्सामान्यशून्यत्वं पक्षे स्वरूपासिद्धमिति वाच्यं। योग्योपाधीनामित्यादिपूर्वोक्तक्रमेण क्वचिदपि व्याप्तिनिश्चयस्यासंभवेन तत्त्वस्य प्रमाणताप्रयोजकत्वासंभवादिति भावः। मणिकृता लिंगस्यानुमानत्वनिरासाल्लभ्यते पूर

राम

९५

यति। साधर्म्यदर्शनस्यवेति। अभिहितव्येवेत्येवकारः संभावनामित्यनंतरं योऽयः तथा चाभिहितं यत्साधर्म्यदर्शनप्रमाणताप्रयोजकं धर्मस्मृत्य
त्वदर्शनरूपं तत्संभावनामनुमानेऽप्रामाण्यस्य संभावनामेवोत्पादयति न त्वनुमितिं यतोनुमानेनैव तदप्रामाण्यसाधने व्याघातः स्यादिति भावः।
बहुज्ञा इति। तथा च परकीयसंदेहादिकमपि संभाव्यैव तदुच्छेदाय शास्त्रं प्रणेतव्यम् इति तद्धीतियोपि दोष इति भावः। यावदसत्ख्यातिर्न व्यवस्था
प्यते तावदेव भ्रमजनकत्वरूपं प्रामाण्यं नोच्यते। तस्याः सिद्धौ तु भ्रममात्रस्यैवासत्ख्यातिरूपत्वादनुमानं न प्रमाणमिति वाक्यस्य भ्रमजनकत्वसि
द्धावप्यनुमानस्य प्रामाण्यसिद्धिरित्याशयेनोक्तमापाततइतिभावः नचेरति वाच्यमिति परेणान्वयः। सन्मात्रावलंबनत्वं सदन्याविषयकत्वं प्रा
माण्यावगाहित्वं सद्विषयकत्वावगाहित्वं। नचसन्मात्रावलंबनत्वादेरपि स्वानतिरिक्तत्वेन स्वेनैव स्वग्रह संभवः। तस्यासद्घटितमूर्तिकत्वेनगति
रिक्तत्वात् संभवौ न याचाध्यक्षनिष्ठस्य सन्मात्रावगाहित्वादेर्ग्रहे तेषामप्रामाणिकत्वापत्तेः। संभावनामात्रस्यैवाप्रमात्वादिति भावः॥ ॥इदं

अनुमानाप्रामाण्यदूषणादिकं व्याप्तिनिश्चये सति व्याप्तिनिश्चयत्वं प्रमाणताप्रयोजकरूपं तच्छून्यत्वं पक्षे नास्तीति स्वरूपासिद्धाऽनुमानाप्रामाण्यं न साधयितुं शक्यत इति भावः॥ ॥समाप्तोयमनुमितिग्रंथः॥ ॥श्री रामचंद्रार्पणमस्तु॥



६६